BHASA KATHA SARA

VOL. I. PARTS I AND II

भासकथासारः

(प्रथमद्वितीयौ भागौ।)

BY

Y. MAHALINGA SASTRI, B.A., B.L.,

KUMBAKONAM

Price 8 Annas

BHASA KATHA SARA

Vol. I.—Parts I & II

BEING A PROSE ABRIDGEMENT OF THE
TRIVANDRUM PLAYS ATTRIBUTED TO
BHASA

BY

Y. MAHALINGA SASTRI, B.A., B.L.,

Son of Mahopadesaka, Sastra Ratnakara,
YAGNASWAMI SASTRI Avl.,
Advaita Sabha Pandit, Kumbhakonam

PUBLISHED FOR THE AUTHOR

BY

R. SUBRAHMANYA VADHYAR,

Bookseller & Publisher,

KALPATHI—PALGHAT.

1928.

PRINTERS:
St. Joseph's Industrial School Press,
TRICHINOPOLY.

॥ श्रीरस्तु ॥

॥ भासकथासारः ॥

भागत्रयात्मके प्रथमद्वितीयौ भागौ ।

महाकवि श्रीभासप्रणीतनाटकानां कथासङ्ग्रहः ।

श्रीमद्भरद्वाजकुलतिलकश्रीमदप्पय्यदीक्षितवंशमुक्ताफलानां
महामहोपाध्याय राजुशास्त्र्याख्यया विख्यातश्रीत्यागराज-
मखिराजानां प्रपौत्रेण महोपदेशक-शास्त्ररत्नाकरादि-
विरुदाञ्चितपण्डितवरश्रीयज्ञेश्वरशर्मणामात्मजेन

श्रीमहालिङ्गकविना

विरचितः ।

पालक्काट्—कल्पात्ति
श्री गीर्वाणवाणीपुस्तकशालाधिपतिना

आर्. सुब्रह्मण्योपाध्यायेन

ग्रन्थकर्तुः कृते प्रकाशितः ।

१९२८.

AUTHOR'S PREFACE.

THE dramas which I have attempted to retell in prose were brought to light a few years ago as a result of the researches of the late Mahamahopadhyaya T. Ganapathi Sastrial, Curator, Government Press, Trivandrum. Upon my first studying them I found them very entertaining and often admirable as examples of high dramatic art. These dramas portray the great lives of most of our popular heroes and heroines. The well-known personalities of Puranic and traditional fame appear in them with a vividness of individuality and an animation of life rarely met with in literature. My object in making these prose summaries is to afford young students of Sanskrit a fore-taste of the joy in store for them when they acquire equipment enough to be introduced to the originals directly.

The prose style of the author of these dramas is unaffected, idiomatic and concise. So charmingly appropriate are his diction and phrasing, that I have not hesitated to weave choice bits into my own narrative in many places. Here and there I have also introduced into the text some verses from the originals to break the monotony of prose.

These thirteen plays fall into three groups, *viz.*, (1) those which borrow their themes from the Bhagavatha and the Mahabharata and, in which, therefore, Sri Krishna figures prominently; (2) those which deal with the story of the Ramayana and (3) those which are based upon tradition and folk-lore. I have recognised this natural division and have commenced the respective parts with separate benedictory verses. And in order to place this work more easily within the reach of readers, I have published it in two separate volumes, the Purva Ardha comprising parts I and II and the Uttara Ardha, the third part.

I have also added a glossary at the end.

It is still a matter of controversy whether these dramas are the genuine works of Bhasa. The fragmentary nature of many of these plays, the coexistence in them of high dramatic excellence and fine poetry with irregularities in construction and uncouth incorrectness of style, the presence in some of them of large gaps which render the trend of the plot itself not altogether clear, and the fact that the "Charudatta" is suspiciously like a shorter recension of the "Mrichchakatika" of Sudraka, are some of the factors that complicate the question of authorship. These plays have come down to us through the medium of the actor-communities of the West Coast and possibly are only mutilated versions of some ancient originals

adapted for stage purposes. Among such originals, it may perhaps be hazarded, was the genuine Swapna Vasavadatta of the great Bhasa. How many others of Bhasa's plays may have been in the same way utilised it is impossible to say.

But, whatever be the solution of the problem of the authorship of these dramas, it is agreed in learned circles that their discovery has made a rich addition to the classic Sanskrit literature. I have deemed it enough for my purpose to adopt the current belief regarding their authorship and have given my version the name of Bhasa Kathasara.

The late Mahamahopadhyaya T. Ganapathi Sastrial of Trivandrum to whom I submitted specimens of the work in manuscript, was kind enough to give me, in an appreciatory note, permission to publish it. It is a great sorrow to me that he has not lived to extend his warm sympathy to it on its publication.

I shall regard myself as amply rewarded for this labour of love if my Bhasa Kathasara succeeds in instilling into students a genuine interest in the study of the original plays themselves.

MYLAPORE, 20-3-28. Y. MAHALINGA SASTRI.

॥ निवेदना ॥

निर्व्याजेन निरञ्जनेन मनसा
स्वप्रत्ययं मानयन्
धीरो यः प्रणयी गुणेषु वहति
स्वच्छन्दमुच्चैश्शिरः ।
तस्यास्वादविदः प्रसादसुधया
नीरन्ध्रमाप्यायितं
कर्मेदं परिचीयमानसुषम
ख्यातिं परां विन्दतु ॥

CONTENTS for Vol. I.

पूर्वार्धे कथानुक्रमः ॥

प्रथमो भागः ।

द्वितीयो भागः ।

॥ श्रीरस्तु ॥

भासकथासारः ॥

प्रथमो भागः ।

॥ बालचरितम् ॥

आपादितप्रलयसुप्तजगत्प्रबोधा-
  धिन्वन्तु सत्कविवचस्सुभगा मुरारेः ।
नाभिह्रदोच्छ्रसदुदारविरिञ्चिसद्म-
  पद्मोदरप्रथमसौरभवीचयो नः ॥ १ ॥

तमालदलमेचकस्तरणिनन्दिनीखेलन-
  स्स्मरालसनितम्बिनीवलयलोचनानन्दनः ।
भुवोभरणविभ्रमं दधदलीक-गोपार्भक-
  स्स कोऽपि मुरलीकलक्वणितमोहनः पातु वः ॥ २ ॥

आसीदखिलभुवनमण्डलमण्डनायमाना शूरसेनेष्वखण्ड-श्रीनिधानं मधुराभिधाना राजधानी । सा किल यदुवंशावतंसेन राज्ञा प्रजानुरञ्जनव्यग्रेणोग्रसेनेन परिपालिता परां संपत्तिमुवाह ।

तस्य च कंसो नाम नृशंसस्तनय आसीत् । अथैष यौवनारम्भे वर्तमानः पापात्मा पितरं परिणतवयसं सिंहासनात् प्रच्याव्य, प्रक्षिप्य च बन्धने, स्वयमग्रहीत् राज्यधुरां, अपीडयच्च प्रजाः, अद्रुह्यदात्मसंबन्धिभ्यो वृष्णिकुलप्रसूतेभ्योऽपि, अभ्यवर्तत नयविहीने हीने मार्गे, अभवच्च साधुभीषणो दुर्जनोपसेवितो, यस्य नाम्नि श्रुतेऽपि जना उद्विजन्ते स्म ॥

स कदाचित् कृतापराधो मधूकमहर्षिणा "स्वसुः वसुदेवदयितायाः देवक्या गर्भात् मृत्युमवाप्स्यसि" इति शप्तस्तौ दम्पती कारायां निगडयित्वा, प्रसूतमात्राणि च तयोरपत्यान्याच्छिद्य स्वयमवधीत् । एवम् औग्रसेनिना क्रूरकर्मणा हतेषु षट्सु बालकेषु देवक्याः, लोकानामभयप्रदानार्थं देवरूपिण्यां तस्यां सुतविडम्बनया साक्षादेव रथाङ्गपाणिराविरासीत् । तस्मिन्नवसरे पुष्पमयी वृष्टिर्दिवः पपात, विनेदुर्देवतूर्याणि, ननृतुः अप्सरसः, प्रसेदुस्साधुमनांसि, मम्लावसुरश्रीः, दुरात्मनः कंसस्य दुरुदर्कसूचनानि निमित्तानि च संबभूवुः—तथाहि, उद्भ्रान्तविद्युदुद्दाममासीन्नभः, अतिरभसोच्चलितचण्डवातानुविद्धजलधरपटलनिर्घोषैः पतितहर्म्यशिखरा चकम्पे मेदिनी । अथ तैस्तैर्निमित्तैरानकदुन्दुभिर्जातस्य रोहिणीरमणसुषमातिशयमनोहरस्य बालकस्य महाप्रभावतामनुमिमानः, स्वस्मिन्नुत्प्रेक्षमाणश्च दैवानुकूल्यं, "सप्तमोऽयं मम दीर्घायुः मा यासीत् कंसेन मृत्युम्" इति निश्चित्य, कथमपि समाश्वासितायाः प्रणयिन्या अङ्कादादाय मन्दरागिरि-

प्रतिमगरिमाणं निरुपमानं तमात्मजन्मानम्, अर्धरात्र एव प्रसुप्तजनात् सत्वरं नगरान्निरगात् ॥

गच्छंश्च ज्योत्स्नोपरोधिनि तस्मिन् दुर्दिनान्धकारे, कुमारेणोपदर्शितया प्रभया कृतोपकारो, मध्येमार्गमापतितां कालिन्दीं स्वयमात्मानं द्विधा विभज्य दर्शिततलामयत्नेन संततार बालानुभावविस्मितस्सस्मितो वसुदेवः । उत्तीर्णश्च परितो विलोकयन् एषः नन्दगोकुलोपकण्ठस्थमात्मानं अन्वबुध्यत ॥

तत्र च "प्रभाते द्रक्ष्यामि कार्यसिद्धये व्रजाधिनाथं आत्मनो मित्रं नन्दगोपम्" इति चिन्तयन् यावदसौ कस्यचित् न्यग्रोधतरोर्मूलमाश्रयति विश्रमाय, तावदनेनानुस्मृतस्स एव नन्दगोपो हस्ताभ्यां कांचित् मृतदारिकामालम्ब्य रुदन् तत्प्रदेशमुपासदत् । स च समाहूय वसुदेवेन दारिकावृत्तान्तं पृष्टः, "अद्यार्धरात्रे अस्माकं कुटुम्बिन्या प्रसूतेयं दारिका सद्यः प्राणैः व्ययुज्यत । यशोदा च तपस्विनी क्लेशमोहिता नाद्यापि जानाति दारिका वा दारको वा जात इति । अहमपि घोषे श्वो निर्वर्तयिष्यमाणस्येन्द्रयज्ञस्य नाम गोपोत्सवस्यानया वार्त्तया विघ्नमनिच्छन् रहसि स्वयमेवैनामादाय निर्गतः" इत्युक्त्वा काष्ठभूतमपि तं कलेबरं वत्सलत्वात् त्यक्तुमशक्नुवन् परं रुरोद ॥

तमाश्वासयन् वसुदेवः, "सखे मा शुचः। गृह्यतां तत्प्रतिरूपकस्सप्तमोऽयं दीर्घायुर्मम पुत्रः । नास्ति मम पुत्रेषु भाग्यं,

यस्य किल षट्सूनवः कंसेन दुरात्मना निधनमुपनीताः । अस्मिन् कुरु निरन्तरं प्रेम । दग्धभूयिष्ठशेषं यादवानां बीजं एतद्यत्नेन परिरक्ष्यताम्" इत्युक्त्वा अंशुकनिगूहितं राजीवलोचनं बालकं तस्मै स्वयमुपानयत् ॥

मृतदारिकाग्रहणादशुचिमात्मानं मन्वानो नन्दगोपो यदा घोषोचितमाचारमनुरुध्य पांसुना शौचं व्यधित्सत, तदा बालकप्रभावेन धरणीं भित्त्वा युगप्रमाणा सलिलधारोत्थिता । तया च कृतशौचविधिः प्रमोदमेदुरस्सादरं स नयनानन्दनं तमादित्सत नन्दनम् । किं तु यस्समभिद्रवन्तमपि विदारयितुं, वृषभं शृङ्गे गृहीत्वा मोचयति, पङ्कनिमग्नान् भाण्डशकटान् लीलयैवाघट्टयति, तस्यापि नन्दगोपस्य स बालो मन्दरगिरिसमानेन गरिम्णा दुर्वहोऽभवत् ॥

विस्मयमाने च तस्मिन्, भगवतो नारायणस्य दानवोपमर्देषु अमोघवीर्याण्यसाधारणलाञ्छनानि पञ्चायुधानि, वरवाहनं गरुडश्च, मनुष्यलोकमवतीर्णं बालकरूपं तमनुचरितुं गोपालकच्छद्मना घोष एवावतरिष्यन्तस्समुपतस्थिरे । तेषु चक्रायुधस्सुदर्शनो नाम भगवन्तमभिवन्द्य कार्यगौरवमपेक्षमाणो, "जनस्यास्य लघुत्वयोगात् प्रसादं कर्तुमर्हति देवः" इति प्रार्थयामास । ततो नन्दगोपेऽपि, "राजदारक! नमस्ते, नमस्ते; गोपजनस्य त्वां ग्रहीतुं को बलपराक्रमः" इति दैन्यमालम्बमाने, स बालकस्सद्यस्तस्य हस्ततुलनीयोऽभवत् ॥

अथ समादाय बालकं प्रभातायां रजन्यां नन्दगोपो वसुदेवमापृच्छ्य कृतकृत्यमात्मानं मन्वानः प्रतिन्यवर्तत । निर्गते च तस्मिन्, मधुराभिमुखं प्रस्थास्यन् वसुदेवः प्रत्यागतप्राणां रुदन्तीं नन्दगोपविसृष्टां दारिकामालक्ष्य, गृहीत्वा च, पूर्ववत् दत्तावकाशां यमुनामुत्तीर्य देवकीसदनं प्राविशत् ॥

श्रीनाथावतरणमहितायामस्यां रजन्यां औग्रसेनेः चिरेणापि दूरीबभूव निद्रा । चिन्ताग्रस्तचेतसस्स्फुरन्ति स्म तस्य पुरतः मूर्तानीवात्मनो दुरितानि काश्चन चण्डालकन्यकाः, "अस्माकं कन्यकानां त्वया सह विवाहो भवतु" इत्यभीक्ष्णमश्लीलमाचक्षाणाः ; याश्च निर्भर्त्सयति तस्मिन् सहसा अन्तरधीयन्त । ततश्चेतस्समाधातुं अभ्यन्तरं प्रविविक्षुममुं निवारयन्नाविरभूदञ्जनराशिसवर्णो भीमोग्रदंष्ट्रवदनः पिङ्गलाक्ष उल्कां प्रगृह्य साक्षादेव मधूकशापः । स च "हृदयं तव प्रवेक्ष्यामि" इत्यभिधाय सहसा प्रणष्टः । इत्थंभूतैः प्रतिभासैः व्याकुलितमनाः कंसो नयनविश्रममिच्छन् शय्यामुपगम्य क्षणान्निद्रावशो बभूव । तदा लब्धान्तरस्स शापो विष्णोराज्ञेति प्रतिपाद्य राज्यश्रियं कंसशरीरान्निर्वास्य, ज्येष्ठाकालरात्रि-महानिद्राप्रभृतिभिः दुर्देवताभिः परिवृतः "प्राप्नोमि मुनिशापस्त्वामचिरान्नाशमेष्यसि" इति वदन् तमाविशत् । अथोषसि प्रबुध्यन् कंसः पुनः पुनस्संभवद्भिः भूकम्पोल्कापातवातोद्भ्रमणादिभिः किमपि अत्याहितमाशङ्कमानः कार्तान्तिकैस्संमन्त्रयामास ॥

तैश्च—

भूतं नभस्थलनिवासि नरेन्द्र नित्यं
कार्यान्तरेण नरलोकमिह प्रपन्नम् ।
आकाशदुन्दुभिरवैस्समहीप्रकम्पै-
स्तस्यैष जन्मनि विशेषकरो विकारः ॥

इति विज्ञापितो "ज्ञायतां या काप्यद्य प्रसूतवती वा" इति कञ्चुकिनम् आज्ञापयामास । विदित्वाऽऽगतस्स न्यवेदयत्, "देव देवकी खलु प्रसूतवती" इति । श्रुत्वैवं पापहृदयः कंसो मधूकशापत्रस्यन्मनाः, "बालिकेति कृपास्पदमिदमपत्यं जीवतु भवत्प्रसादेन" इति बहुधा कृतप्रार्थनौ देवकीवसुदेवावनादृत्य, धात्र्या हस्तेन दारिकामानाय्य, सरोषमाच्छिद्य, "एष विफलो मे मधूकशापः" इति भूमावविद्ध्यत् ॥

तत्क्षण एव स तोकः उद्यतशूलमुग्रदर्शनं कात्यायनीरूपमाबभार । तामावृत्य कुण्डोदरशूलनीलमनोजवादयस्तस्याः पार्षदाः समुदतिष्ठन् । तत्र च देवी, "कंसक्षयार्थमेव प्रसूताहं वसुदेवकुले । सपरिवारा च गोपालवेषप्रच्छन्ना घोषमवतरिष्यामि भगवतो दामोदरस्य बाललीलाविभूतिमनुभवितुम्" इत्युदीर्य सद्यस्सानुगा तिरोबभूव । अथ भयविस्मयाकुलहृदयः कंसो दुर्निमित्तानामेषां विपुलं शान्तिकर्म विधातुं मनो दधे ॥

दामोदरप्रवेशेन नन्दगोकुले प्रतिक्षणमुल्लास समृद्धिरदृष्टपूर्वा । बहुलीभूतामिमां नन्दसूनुप्रशस्तिमाकर्ण्य, कात्यायनीवचांसि च

स्मरन्, कंसस्स्वशिक्षणार्थं अवतीर्णममुं देवताविशेषमाशङ्क्य, तं बाल्य एव घातयितुं राक्षसान् न्ययूयुजत् । तत्र प्रथमा-पूतना नाम राक्षसी दामोदरं नन्दगोपवधूवेषेण विषदिग्धस्तनं पाययन्ती पयसीव प्राणेष्वपि तेन चूषिता ममार । मासजात एषः शकटासुरमाततायिनं पादाघातेन चूर्णयामास । अथ कतिपयमाससञ्जातचङ्क्रमशक्तिर्नन्दकिशोरस्तत इतस्सञ्चरन् अज्ञातप्रवेशापक्रमणो गोपगृहेषु दधिक्षीरनवनीतादीनि गव्यानि प्रतिदिनमचूचुरत्; स्वैरं निजकेलिसब्रह्मचारिभ्यस्सखिभ्यश्च विभाजयांचक्रे । अस्य च दुर्नयं गोपाङ्गनाः यशोदायै न्यवेदयन् । तद्दाक्षिण्येन नन्दगोपी निरूपितागसं सुतमुलूखले रज्वा बबन्ध । महाप्रभावो बालकस्तेनैवोलूखलेन प्रचलितस्स्वमभिद्रोग्धुं उपस्थितौ वृक्षरूपिणौ यमलार्जुनौ नाम दानवावाघट्टयन् निपातयांबभूव । तदादितश्च गोपजनास्तं दामोदरनामानमाचख्युः । ततः क्रमेण, सङ्कर्षणं प्रसह्यापहर्तुकामः प्रलम्बः, क्वचित् तालीवनक्रीडासक्तं नन्दकुमारं जिघांसन् गर्दभवेषभीषणो धेनुकः, कदाचित् तुरगरूपेणाभिपतन् कृष्णं हिंसितुकामः केशी चेति त्रयः, कंसप्रियचिकीर्षवो दानवमुख्याः स्वस्वरक्षार्थं सङ्कर्षणेन कंसारातिना च स्वयूथ्यानां सरणिमनुप्रापिताः ॥

अथ कदाचित् वाद्यमानेषु आतोद्येषु, प्रफुल्लकमलवदनाभिः चम्पकगौरीभिः वन्यकुसुमाकल्पमनोहराभिः, आलापमधुराभिर्गोपकन्याभिर्हल्लीसकमनुभवन्तं, अनुरागपेशलहृदयं दामोदरमभि-

युयोजारिष्ट-नामा वृषभरूपी कोऽपि दानवः। स च, खुरपुटाघातै-र्भूमितलं विदलयन्, शृङ्गाहतिभिर्नदीकूलान्यवकिरन्, समुद्धते-नाक्रमणेन कम्पयन्निव मेदिनीं, घोरेण हुङ्काररवेण निपातयन्निव गगनतलं, भयार्तैः प्रपलायितैः गोपजनैस्सोद्वेगमीक्ष्यमाणः, कृष्ण-मुपागम्य, भीषणैर्निजाटोपैरपि न भीतं, नापि विस्मितं, तं विलोक्य, "सारवान् खलु अयं बालः" इति चिन्तयन्, साव-हेलमित्थमुदाजहार—"भोः, बालस्त्वं अतः खलु भयं न जानासि" इति। तमवधीरयन् आह दामोदरः, "भो गोवृषाधम, किं बाल इति मां प्रधर्षयसि? बालेन कृष्णसर्पेण दष्टः किन्न म्रियते? किन्न बालस्स पुरा यः क्रौञ्चं विदारयामास? अपि च, रे मूर्ख, किं पल्लवमात्रेण वज्रेण न निपात्यते कठिनोपलसञ्चयो महान् शैलः? एष यदि मम भुजदण्डनिपीडितं त्वां भूमौ निपात्य न निष्पेषयिष्यामि, नास्मि दामोदरः" इति ॥

अथ प्रवृत्ते तयोर्महति युद्धे, स वृषभः पादेनैकेन अवस्थितं तं बालकं स्थानात् चालयितुमपि अशक्नुवन् मूर्च्छितः पपात। समाश्वस्य पुनरचिन्तयत्—"अहो दुष्प्रसहोऽयं बालः। किन्नु रुद्रोऽयं भवेत् उत शक्रः। तर्कयामि नूनमेष स एव पुरुषोत्तमो, यः त्रिलोकरक्षणाय यत्र यत्र वयं जाताः तत्र तत्रास्मानुत्सादयितुं स्वयमाविर्भवति। हतस्यापि अनेन मम अक्षयो लोको भविष्यति" इति। समर्थ्य चेत्थं युद्धार्थं भूयः कृतसंभ्रमो गर्जन् एष दुरात्मा, दामोदरेण शृङ्गयोरादाय दूरोत्क्षेपणलीलया

निपातितो, वज्राहत इवाञ्जनगिरिर्विशीर्यन्, नासाऽऽस्यनेत्रविवरेभ्यो वमन् रुधिरधारां पञ्चत्वमवाप ॥

तदात्वे ससम्भ्रममापतन्तीभिर्गोपदारिकाभिः, "अहो अत्याहितम्! सङ्कर्षणः खलु यमुनाह्रदनिवासिनमुद्वान्तगरलभीषणं दुष्टसर्पं कालीयं नियन्तुमभिपतति। तन्निवार्यतां साहसादयं अविलम्बेन" इति प्रार्थितो नन्दसूनुः, "पश्यन्तु पश्यन्तु भवत्यः। अहमेव तद्दर्पशमनं करोमि" इति सत्वरं परिक्रम्य हेलया कालिन्दीसलिलम् अगाधमवीविशत् ॥

अथावलोकयत्सु तीरमास्थाय विस्मयातङ्कमन्थरेषु गोपालकेषु, कतिपयैरेव निमेषैरप्रमेयप्रभावस्सबालो महाभोगं वासुकिप्रतिमं तं नागराजं निष्क्रमय्य, पञ्चस्वपि तस्य शिरस्सु पर्यायनिपतच्चरणकमलः प्रारभत नृत्तलीलामनुभवितुम्। पराभिमर्शासहनस्सः रोषाविष्टः कालीयः भीषणं श्वसन्नुद्ववाम दहन्निव त्रिलोकीं करालां विषानलज्वालाम्। परं तु, महतापि प्रयासेन शिरःपदाधिरूढं बालकं दग्धुमथवोत्त्रासयितुमप्यशक्नुवन्, विफलश्रमस्तमजय्यं साक्षादेव नारायणमाकलय्य, अवनतशिराः स भोगी स्तुतिभिः क्षमापयितुमारेभे। व्यादिशंश्चात्मानं गरुडभयात् यमुनाह्रदप्रविष्टं भगवन्तमभयं ययाचे। तस्मै प्रसन्नो दामोदरो गरुडभयनिवारणीं तन्मूर्धसु निजपदमुद्रां दत्वा, "संहृत्यात्मनो विषं ह्रदादस्मान्निस्सर" इत्याज्ञाप्य च, विस्मयमूकं निजोत्सुकं गोपालमण्डलमुपासदत् ॥

एवं यमुनाजलं पानस्नानार्हमाकलय्य, तद्ध्रदोपान्तादुपाहृतैः कालीयभयादनपचितपूर्वैः पुष्पसञ्चयैरनुरञ्जिताभिर्गोपकन्याभिः परिवृतः तिष्ठन् दामोदरः, तत्क्षणादागतेन कंसभटेन "मधुरायां निर्वर्तयिष्यमाणधनुर्यागमुद्दिश्य, ससङ्कर्षणस्य भवतस्सान्निध्यमिच्छति सद्य एव महाराजः" इति विज्ञापितो, निजबन्धुमित्रादीनामन्त्र्य साग्रजः कतिपयैर्गोपदारकैरनुगम्यमानो मधुरापुरीमभिप्रतस्थे ॥

अथ प्रविशन्नेव कंसराजधानीं माधवो मार्गसङ्गतेभ्यो राजकुलरजकेभ्यो वस्त्राण्याच्छिद्य जग्राहेति तमभिघातयितुं महामात्रेणोत्पलापीडो नाम गन्धहस्ती संचोदितः । तमापतन्तमद्रिसन्निभं गजेन्द्रं हस्तोत्पाटिततदीयविषाणेनैव प्रहरन्नवधीत् नन्दसूनुः । ततो निरन्तरोत्सवव्यतिकरावसक्तमाल्यदामशोभितमुत्थापितागरुधूमाधिवासितावकाशं, राजमहापथमवगाढः, कन्दर्पसुन्दरस्स पुरसुन्दरीणां नयनोत्सवमादधानः कृष्णो, मदनिका नाम्न्या कुब्जिकया राज्ञो गन्धवाहिन्या, बहुमानेन दत्तैः गन्धविशेषैस्स्वगात्रमनुलिप्य, तामपि हस्तावमर्शेन विगतकुब्जभावामकार्षीत् । प्रविशंश्च, मालाकारापणांस्तेभ्यः पुष्पाण्याहृत्यात्मानं मण्डयामास । तदनु, सुरक्षितामपि कंसस्य यज्ञशालां बलाद्द्वाःस्थनिग्रहेणाक्रम्य, तत्र पूजार्थं स्थापितं धनुरादाय लीलयैवाभञ्जयन् ॥

एतानि कृष्णाचरितानि वीरचरितानि निशम्य प्रबलोद्विग्नमानसः कंसश्चाणूरमुष्टिकौ मल्लवरौ मल्लयुद्धप्रसङ्गेन कृष्णरामौ

घातयितुं न्ययोजयन् । अथाप्रतिमल्लौ सङ्कर्षणदामोदरौ, तौ मल्लौ निष्पिपेषतुः । क्षणादेव दामोदरस्समुत्पत्य, प्रासादशिखरान्नियुद्ध-मवलोकयन्तं, स्वजनयित्रोर्बन्धनक्षेपक्रूरकर्माणं, निजाग्रजन्मवध-महापातकिनं, स्वस्मिन्नप्याततायिनं, प्रजापीडनं नृशंसचरितं, कंसं, सरोषं, शिरोरुहेषु प्रगृह्य भूमावपातयन् । अभिघातक्षतशरीर-स्सद्यः पञ्चत्वमाप कंसः ॥

अथ हा हेति कृतस्वने तुमुलीभूते जनपदे, कंसहन्तार-मभियोद्धुं संरभमाणे सेनासमूहे, सरभसमाविर्भूय वसुदेवः, "ममात्मजन्मानाविमौ विष्णोरंशभूतौ कंसवधार्थमवतीर्णौ सङ्कर्षण-वासुदेवौ किन्न वेत्थ" इत्युद्घुष्य प्रशान्ततामनयत् मण्डलानि । तदा कंसनिपूदनेन प्रहृष्टाः पातितकुसुमवृष्टयो देवाः नारदं पुरस्कृत्य भगवन्तं दामोदरं अभिनन्दयामासुः । स तु कंसविजयी, कारागृहात् उग्रसेनं विमुच्याभिषिच्य च महाराजपदे, तत्साहाय्येन वर्त्तमानो भुवनमङ्गलमाचरन् मधुरायां बन्धुमण्डलाभिनन्दित-स्सुखमुवास ॥

॥ मध्यम व्यायोगः ॥

द्यूतापहारितराज्येषु अरण्यमधिवसत्सु पाण्डवेषु कदाचित् धौम्यमहर्षेश्शतकुम्भं नाम यज्ञमनुभवितुं प्रस्थितैः भ्रातृभिः आश्रमरक्षानियोगेन भीमसेनस्स्थापितः । स च व्यायामपरिचयार्थं विप्रकृष्टदेशमनुदिनं गच्छति । एवमाचारं तमधिगत्यान्यस्मिन् अरण्यभागे वास्तव्या तत्परिगृहीतपूर्वा हिडिम्बा नाम राक्षसी "विविक्त एष क्षणो लब्धः; पुनरपि प्राणेश्वरं दिदृक्षे । स च जानातु महाबलपराक्रमेणात्मनस्सुतेन वर्धमानं पाण्डवपक्षम्" इति विचिन्त्य, पुत्रं भैमसेनिमाहूयादिदेश । "ममोपवासनिसर्गार्थमस्मिन् वनप्रदेशे कश्चित् मानुषः परिमृग्यानेतव्य" इति । अत्र च तस्याः अभिसन्धिः, यत्किल निर्मानुषे तस्मिन् विपिने कचित् भीमसेनमेवासावासाद्य बलादानयेत् । तदा च भीमो बलमस्य विजानीयादिति ॥

घटोत्कचस्तु मातुरनवगतयथार्थाभिप्रायः मानुषमन्विष्यन् वनोदराणि बभ्राम । भ्रमंश्चाससाद यदृच्छया, पाण्डवाश्रमस्य नेदीयसा वर्त्मना गच्छन्तं स्वमातुलेयस्योपनयनं अनुभवितुं सपुत्रदारमभिप्रस्थितं केशवदासं नाम वृद्धब्राह्मणम् । अथ जनन्याः पारणानिर्वहणमनेन विप्रकुटुम्बकेन संपादयिष्यन् स तमभिदुद्राव ॥

बभ्रुकेशं, मधुनिभनयनं, स्फुरदुद्वृत्तदंष्ट्रं, जलदानीलं, महाकायं भीमदर्शनं, तमनुपतन्तं वीक्ष्याशरणः सपुत्रदारः केशवदासः तत्रास । भयार्तमगतिकं तं शोचनीयावस्थं ब्राह्मणकुटुम्बकं उपासीदन् विमृश्य जातानुकम्पो घटोत्कचः केशवदासमाहूय समयमित्थमाचचक्षे—"पुत्रमेकमुत्सृजन् द्विपुत्रः पत्न्या सह मोचयिष्यसे । अन्यथा सकुटुम्बः क्षणेनैव विनाशम् उपयास्यसि" इति ॥

वृद्धः प्राह—"जर्जरमिदं कृतकृत्यमात्मनश्शरीरं सुतापेक्षी राक्षसाग्नौ होष्यामि" इति । तन्निवारयन्ती ब्राह्मणी, "गृहीतफलेनैतेन शरीरेणार्यं कुलं च रक्षितुमिच्छामि" इति राक्षसाय आत्मानमुपानिनीषत् । "स्त्रीजनो वा वृद्धो वा ममाम्बायाः अनभिमत" इति तौ निराकुर्वति घटोत्कचे, त्रयोऽपि विप्रसूनवः गुरुरक्षणश्रद्धया स्वं स्वमात्मानं तस्मै उपाहरन् । तदा "ज्येष्ठमिष्टतमं न शक्नोमि परित्यक्तुम्" इति वृद्धः प्रथमं पुत्रं निववार । ब्राह्मणी च कनिष्ठे दर्शितादरा तस्यानपायमैच्छत् ॥

उभाभ्यामपि परित्यक्तो मध्यमः पितरावभिवाद्य आमन्त्र्य च राक्षसमुपासदत् । एवं प्राणपरित्यागकृतव्यवसायस्स विप्रकुमारः, "प्रकल्पितपरलोकस्यात्मनः पिपासाप्रतीकारं कृत्वाऽऽगच्छामि" इति घटोत्कचमापृच्छ्य जलाशयमन्विष्यन् ययौ । निष्क्रान्ते च तस्मिन् केशवदासः, मृत्युमुखे उपायनीकृतं पुत्रकं स्मारं स्मारं भृशमन्वतप्यत । तदा च "चिरायते खलु विप्रवटुः ।

अतिक्रामति मातुराहारकालः" इति कृतत्वरो घटोत्कचः "भो भो! मध्यम, मध्यम! शीघ्रमागच्छ" इति शब्दापयामास॥

अत्रान्तरे व्यायामव्यग्रो वनान्तप्रतिनादितं तं महास्वनं निशम्य पाण्डवमध्यमः, "को नु खलु मामत्र शब्दापयति" इति साशङ्कं तत्प्रदेशमुपासदत्। निभल्य च प्रवीरदर्शनं पुनस्तथैव शब्दापयन्तं घटोत्कचं, सोऽभ्यधात् "भोः प्राप्तोऽस्मि कस्मादाहूयते" इति। "मध्यमं शब्दापयति मयि कस्त्वं प्राप्त" इत्याचिक्षेप हैडिम्बेयः। स प्रत्यवादीत्—"अतः खलु अहं प्राप्तः न मत्तः परो मध्यमः"। शृणु तावत्—

"मध्यमोऽहमवध्यानामुत्सिक्तानां च मध्यमः।
मध्यमोऽहं क्षितेर्भद्र भ्रातॄणामपि मध्यमः॥
मध्यमः पञ्चभूताना पार्थिवाना च मध्यमः।
भवे च मध्यमो लोके सर्वकार्येषु मध्यमः॥" इति।

एवं विवदमानयोरनयोर्विप्रसुतो न्यवर्तत। तन्निशाम्य "मध्यम, इत इत" इत्युपाह्वयति राक्षसे, वृद्धब्राह्मणः प्राप्तं महापुरुषं, विदितपाण्डवाश्रमवृत्तान्तत्वाद्भीमसेनमेव निश्चित्य "परित्रायस्व ब्राह्मणकुलम्" इति तं शरणयांबभूव। भीमो विप्रायाभयं दत्वा मुच्यतां तपस्वी सकुटुम्बोऽयं द्विज इति घटोत्कचमादिशत्। "मातुर्मम हिडिम्बायाः आज्ञया गृहीतोऽयं मत्पिता वृकोदरश्चेत् स्वयमर्थयते तदापि न मुच्यते किमुत त्वदर्थे" इति प्रतिवदन्तं हैडिम्बेयं यदृच्छयोपन्यस्तपुत्रभावं मनस्यभिनन्दन् स पुनरपि

अगदन्, तत्सारं तुलयितुकामो मध्यमपाण्डवः "क्षत्रियोऽहं मच्छरीरेण ब्राह्मणशरीरं विनिमयितुमिच्छामि । त्यज्यतां विप्रकुमारः । अहं त्वामनुसरामि । अथवा यदि ते शक्तिरस्ति बलात्कारेण मां नय" इति । तथेति प्रतिपद्यमाने घटोत्कचे भीमः, "कस्ते पिता? किमसौ शक्र उत शक्तिधरः?" इति तत् पितरमधिक्षिपन् व्याजेन तं प्रकोपयामास । क्रुद्धश्च घटोत्कचः प्रोत्खातैः महीरुहैः उत्पाटितैश्च शैलकूटैः तमविद्ध्यन् । चिरेणापि विफलश्रमः तेन सह नियुद्धमकरोत् । कथञ्चिदपि नाशकत्तं हन्तुम् । ततो मातृप्रसादलब्धेन मायापाशेन तं बबन्ध । भीमसेनो मन्त्रं जप्त्वा मायाममोचयत् । अन्ततो घटोत्कचः खिन्नस्सन् समयमनुस्मारयित्वा वृकोदरमुपच्छन्दयामास । समय इति निरुत्तरस्सोऽप्यन्वगच्छत् ॥

हैडिम्बेयः स्वमातरमुपगम्य तस्या आहारार्थं आसादितं मानुषमदर्शयत् । हिडिम्बा विहस्य प्राह "उन्मत्तक मदुपवासेनाराधनीयं दैवतमेव त्वयाऽऽनीतम् । भीमसेनः खलु एषः । अभिवन्दस्व पितरम्" इति । स्वयमपि प्रणयिनमुपसृत्य जयशब्दमुदैरयत् । "भ्रष्टराज्यानामस्माकं वीरसुवा भवत्या महदुपकृतमिति सोऽपि तामभ्यनन्दत् । लज्जाविस्मयशबलमुखरागो घटोत्कचः पुत्रचापलं क्षन्तुमर्हसीति पितरमभिवाद्य तन्नियोगेन वृद्धब्राह्मणमपि अवन्दत । ततस्सत्कृतविसृष्टः केशवदासः तेभ्यः आशिषः प्रयुज्य स्वमार्गमनुससार । हिडिम्बा च स्वमनोरथस्सुपर्यवसन्न इति तुतोष ॥

॥ पाञ्चरात्रम् ॥

क्रमेणोत्तीर्णवनवाससमयबन्धेषु पाण्डुपुत्रेषु, प्रच्छन्नतया विराटनगरमधिवसत्सु, स्वजनवञ्चनामालिन्यं किञ्चिदिव प्रमार्ष्टुं कुरुराजो गुरुजनतोषणमनल्पविभूतिविश्राणनश्लाघनीयसमृद्धि, यज्ञकर्मारेभे । तच्चामोदितुं विराटमन्तरेण समागतस्सर्वो राजमण्डल:, वासुदेवेन स्वप्रतिनिधित्वेन प्रेषितोऽभिमन्युश्च ॥

अथ सकलनरपाललोकसभाजितयज्ञपरिसमाप्तिस्सुयोधनो ब्राह्मणसन्तर्पणावसरे धनुराचार्यं द्रोणं तदभीष्टदक्षिणां ग्राहयितुमियेष । तदूर्जितवचनदत्तविस्रम्भो धर्मपक्षपाती आचार्यः "शकुनेरवलेपपारुष्यादुपलम्भितकान्तारभ्रमणानां निराश्रयाणां पाण्डवानां कुरु राज्यार्धसंविभागं, एषैव मम भिक्षा दक्षिणा च भविष्यति" इति तमयाचत । निसर्गजिह्मतिस्तु शकुनिः, "किमप्रस्तुतमुत्पाद्य युक्तेयं भवतश्शिष्यवञ्चना" इति आक्षेपवचनरौक्ष्यमाशिश्रिये । तस्यानार्यभावं विगर्हमाण आचार्यो धर्मातिक्रमे बलात्कारेण पैतृकं राज्यं हर्तुं समर्थान् पाण्डुपुत्रान् व्यादिशन् । दुराक्षेपिणा च दुर्योधनेन कलहायते स्म ॥

तदा कर्णगाङ्गेयावुपान्तिके "मार्दवेनैवैष वाह्यो दुर्विनीतः शिष्यकार्यार्थिना भवता। अन्यथा विकुर्वीत" इति आचार्यं प्रत्यबोधयताम्। द्रोणोऽप्यनुचिन्त्य सानुनयं पुत्रेत्याभाष्य सुयोधनं "धर्मोऽयमिति, तव प्रभवतो मे वचनम्" इति च, प्रशमय भेदं पाण्डवेषु इत्युपादिक्षन्। दुर्योधनस्तु कार्यं शकुनिना समर्थयितुं इयेष। तेन ह्याचार्यः कार्यलोभात् मिथश्शकुनिमाहूय आलिङ्ग्य च ससान्त्वमात्मनो जरोपहतस्य क्रोधप्रायं वचनं क्षन्तुमभ्यर्थयामास। शकुनिस्तु प्रकृतिजिह्मतिस्सुयोधनेन पाण्डवानां राज्यार्धदानं प्रति निश्चयं पृष्टो न दातव्यमित्येवाब्रवीत्। अपि च सभामध्ये गुरोः प्रतिज्ञाय सत्यवचनात् प्रस्खलनं असम्मन्वानं सुयोधनं "अनृतवचनात् खलु त्वं मोचयितव्यः तन्निरशङ्को भव" इति समाधाय उपसृत्य चाचार्यं व्यजिज्ञपत्। "यदि पञ्चरात्रेण पाण्डवप्रवृत्तिरुपानीयते राज्यार्धं प्रदास्यति किल कुरुराज" इति॥

तदानीं भीष्मेण "पौत्र धर्मच्छलं मा भूत्। सत्यप्रतिज्ञो भव" इत्यनुनीयमानोऽपि दुर्योधनः शकुनिमेवान्ववादीत्। तेन च "आद्वादशवत्सरादज्ञातगतयस्ते पञ्चरात्रेणोपलब्धव्या इत्यसुखनिर्वहणमेव। हन्त! निष्फलाशंसोऽस्मि संवृत्तः इति विमनायमाने धनुराचार्ये, कश्चन दूतः प्रविश्य अशस्त्रजनितकीचकभ्रातृशतनिधनव्यापदं विराटस्य यज्ञसभाजनानागमनकारणमुपन्यास्थत्। श्रुत्वैवं गाङ्गेयः—"अभीमस्यैतद्दुष्करं कर्म। दिष्ट्या सुगमा

पाण्डवप्रवृत्तिः" इति प्रोत्सहमानः आचार्यं पञ्चरात्राभिसन्धिमभ्युपपत्तुं त्वरयामास । पश्यंश्च येन केनापि प्रकारेण विराटप्रधर्षणमेव तदाश्रितपाण्डुपुत्रप्रकाशनोपायं, स दुर्योधनं विराटस्य यज्ञानादराहितागसो गोग्रहणं कर्तुं उद्योजयामास । अथ प्रातिष्ठन्त सर्वेऽपि यज्ञसभाजनागतैस्सह राजभिर्विराटनगरमुद्दिश्य समारूढरथतुरगास्सद्रोणभीष्माः धार्तराष्ट्राः । सन्निकृष्य च घोषं तुरगखुराकीर्णधूलीपटलप्रच्छन्नपरिस्पन्दाः परिवार्य राज्ञो वर्षवर्धनगोप्रदाननिमित्तं नगरोपवनवीथ्यां गोपालकैस्सङ्क्षिप्यमाणं गोमण्डलं निर्दयमाहरन्ति स्म । अथ जन्मनक्षत्रमङ्गलक्रियाव्यापृते महाराजे, वित्रस्तगोपालककुलनिवेद्यमानं गोधनहरणमुपश्रुत्य बृहन्नळाव्यञ्जनोऽर्जुनः कुमारेणोत्तरेणाधिष्ठितं रथं वाहयन्निर्गत्य, परिगृह्य च श्मशाने निगूढनिक्षिप्तं गाण्डीवं, दुर्योधनादीन् सन्ततशरधारावर्षेण कान्दिशीकतामनयत् । भीष्मद्रोणौ तदिदमर्जुनकर्मेति प्रत्यभिज्ञाय प्रहरणादुपरेमतुः । अभिमन्युः केवलं बाल्यादगणितभयो युद्धान्न निववृते । पुत्रमभियोद्धुं वैक्लब्यादसमर्थः पार्थो विमोचितगोमण्डलः परावृत्य रथं, भगवद्व्यपदेशेन युधिष्ठिरेण स्वस्थवाक्यैरुच्छेद्यमानयुद्धाभियोगसंभ्रमं राजानमुपातिष्ठत ॥

तावता च विराटकुले सूदछद्मना स्थितो भीमो रणाजिरमाविश्य सङ्ग्रामभीममन्युमभिमन्युं हस्तेनावस्थापितात् रथादवतार्य परिष्वजन् विराटसमीपमुपनिन्ये । तत्राभिमन्युर्भीमार्जुनौ विराटश्च

शत्रुधिया पश्यन् विप्रलाञ्छनं युधिष्ठिरमेवाभिवन्द्य अवज्ञाभङ्गुरापाङ्गस्सावष्टम्भगम्भीरमवतस्थे । ते तु तमभिभाषणकौतूहलेन बह्वनुयुञ्जाना मुखरयित्वा गुरुगौरवगर्भितन्यक्कारमधुरं रुष्यता क्षिपता च तेन सुतरां रेमुः ॥

एतस्मिन्नन्तरे प्राविशन् बृहन्नळाप्रख्यापिताळीकविक्रमप्रशंसामसृष्यमाणो यथावृत्तां सङ्ग्रामकथां राज्ञे निवेदयितुमाहितत्वर उत्तरः । प्रकाशयामास च बृहन्नळाव्यपदेशच्छन्नं गाण्डीविनमेव धार्तराष्ट्रविद्रावणम् । अथ निर्भिन्नप्रायं रहस्यमिति धनञ्जयस्सूदमेव भीमसेनं भगवन्तमेव च युधिष्ठिरं प्राव्यञ्जयन् । अतः पाण्डवास्तीर्णप्रतिज्ञत्वात् स्वं स्वमाविश्चक्रुः । विस्मितः प्रहृष्टश्च विराटपतिस्सत्यसन्धानां पाण्डवानां निवासेन स्वकुलं नष्टकल्मषममन्यत । अभिमन्युरपि "दिष्ट्या गोग्रहणं स्वन्तं पितरो येन दर्शिताः" इति परितुष्य गुरून् सविनयमभिवादयाञ्चक्रे । अथ प्रीतेन राज्ञा गोग्रहणविजयशुल्कार्थं प्रदिष्टामुत्तरामर्जुनस्स्नुषार्थे प्रतिजग्राह । भीष्मादीनाञ्चाभिमन्युविवाहावेदनायोत्तरमेव दूतं प्राहिणुतां विराटयुधिष्ठिरौ ॥

अत्रान्तरे दुर्योधनसदसि सर्वे सौभद्रस्य हरणेन पराभूता नात्मनो मन्यमाना भृशं विमनसस्तस्थुः । तत्प्रत्याहरणार्थं शकुनिवर्जमन्ये संभ्रममायन् । तीव्रवेगेन केनापि पदातिनाऽतिबलेन स बाल उत्क्षिप्य नीत इति सूतेनावेदिते, भीष्मद्रोणौ भीमस्यैव महाबलस्य लीलैषेति प्रत्यपादयताम् । सूताहृतश्च शरः अर्जुन-

नामाङ्कित आसीत् । पञ्चरात्राभ्यन्तर एव पाण्डवप्रकाशं अनभिनन्दन्नीर्ष्याकुलः शकुनिः "अपि नाम भीमादन्यः प्रवीरो नास्ति, येनाभिमन्युग्रहणं घटते। किमिति न स्युरेतानि मार्गणानि अर्जुनाभिधस्य कस्यचित्सामान्ययोधस्य । पाण्डवानां राज्यप्रदानार्थिनो यूयमनृतमुद्भावयथ" इति तन्मतं निराकरोति स्म । इत्थं ससुयोधने शकुनौ खलभावेन विवदमाने, दूतेन प्राप्त उत्तरो युधिष्ठिरसन्देशमाचख्यौ । पञ्चरात्राभिसन्धिस्संपूर्ण इति दक्षिणां सद्यः प्रदीयमानामपैक्षत द्रोणाचार्यः । सुयोधनोऽपि पाण्डवेभ्योऽर्धराज्यप्रदानमभ्युपजगाम । तेन हि सर्वे प्रसन्ना-बभूवुः ॥

॥ दूतवाक्यम् ॥

अरण्यवासेन महद्दुःखमनुभूय संपूर्णसमयाः पाण्डवाः पुनः प्रति न्यवर्तन्त । तेषां प्रतिश्रुतपूर्वं धर्म्यं दायाद्यं विभज्य दातुमसंमन्वानो बलदर्पादाहवकुतूहली लुब्धस्सुयोधनो "नियतं ते विप्रकृताः हठमाश्रयेयुः" इत्युत्पश्यन् युद्धनिमित्तं सेनासन्नाहं चक्रे । मन्त्रयित्वा च स्ववर्ग्यैः पितामहं भीष्मं सेनापतित्वमङ्गीकारयामास । शान्तात्मा युधिष्ठिरः कुलक्षयकरं बन्धुमित्रादिभिस्सह वृथा कलहं यथाशक्ति परिहरिष्यन् आहवदृप्तं सुयोधनं प्रति वासुदेवं दूत्यमग्राहयत् ॥

बन्धुभिस्सामन्तैश्च सुयोधने मन्त्रशालामधितिष्ठति वासुदेवो दूत्येन तच्छिबिरद्वारि सन्निदधे । दूतस्यागमनं काञ्चुकीयो राज्ञे न्यवेदयत् । दुर्जनस्सुयोधनः पाण्डवावलम्बभूतस्याच्युतस्य तत्रैव ग्रहणं जयौपयिकं मन्यमान "आनीयतां स दूत" इत्यादिशत् । मन्त्रयमाणान् राज्ञश्चाज्ञापयत् "योऽत्र केशवस्य प्रत्युत्थास्यति स मया दण्ड्य" इति । स्वयमप्यालिखितद्रौपदीमानहरणवृत्तान्तं चित्रपटमानाय्य तस्मिन् दृष्टिविन्यासं कुर्वन् "एवं केशवमनालक्ष्येव स्थास्यामि" इति कृतनिश्चयोऽभवत् । अथ काञ्चुकीयप्रवेशिते वासुदेवे दृष्टमात्रे सर्वे भूपतयः संभ्रमविस्मृतात्मानस्तस्य प्रत्युत्तस्थुः ।

कृष्णसङ्कल्पेनाबुद्धिपूर्वकमासनाच्चचाल सुयोधनोऽपि । अनन्तरमासीनेषु सर्वेषु, मिथः कुशलानुयोगेष्वप्यवसितेषु, वासुदेवो धर्मसूनोस्सन्देशं सुयोधनमाश्रावयामास ॥

अनुभूतं महद्दुःखं संपूर्णस्समयस्स च ।
अस्माकमपि धर्म्यं यत् दायाद्यन्तद्विभज्यताम् ॥ इति ।

स्वयमबोधयच्च तं—"मा तावत्परस्परविरोधवर्धनेन कुरुकुलं नामशेषतान्नयतु भवान्" इति । तं प्रत्यभाषत दुर्व्यवसायपरुषं इत्थं दुर्योधनः । "यमेन्द्रपवनाश्विनीदेवताप्रभवाणां कुन्तीसुतानां युधिष्ठिरादीनां मया सह बन्धुतैव नास्ति । कथं पुनर्दायाद्यभाजनता? अपि च राज्यन्नाम रिपुभ्यो भुजबलेनाह्रियते, न तु कश्चिद्याच्यते । यदि स्वबलपराक्रमे प्रत्ययस्साहसन्ते कुर्वन्तु" इति ॥

तस्योत्सिक्तवचः प्रत्याख्यातः कृष्णस्तं साम्ना अप्रसाद्यं मत्वा परुषाक्षरैस्संक्षोभयिष्यन्नर्जुनस्य विस्मयनीयानि वीरापदानान्यभिवर्ण्य "मद्वाक्यादर्धराज्यमददन्महाप्रभावैः पाण्डवैर्हृताखिलराज्यो विपत्स्यसे" इति निर्भर्त्सयामास । दुर्दान्तस्तच्छ्रुत्वा सुयोधनः, "पितृभुक्ते वीर्यगुप्ते स्वराज्ये तृणमपि न दास्य" इति सक्रोधं प्रतिजानन् सुदूरमधिचिक्षेप वासुदेवं गोपालक इति करिवृषभतुरगहननमात्रपौरुष इति राजभिरनाभाष्य इति च । एवमवज्ञातः क्रुद्धो वासुदेवः सहसा निर्गन्तुकामः प्रचचाल । तद्वीक्ष्य सुयोधनो "बध्यतां बध्यतां केशव" इति ससंभ्रमं स्ववर्ग्यान् प्रेरयन्

तेष्वशक्त्या पराङ्मुखीभवत्सु द्विगुणीभूतरोषः स्वयमेवाभ्यपतत् कृष्णं बद्धुम् । तदा वासुदेवस्तस्य बालिशत्वमुपहसन् स्वं विश्वरूपमाविश्चकार । क्षणादेव क्वचित् ह्रस्वं क्वचिद्दीर्घं कदाचित्तिरोहितं पुनर्मन्त्रशालामावृत्य सहस्ररूपेण स्थितं च केशवं दृष्ट्वा मायामोहितस्सुयोधनस्साग्रहं, "एकैकः केशवो बद्ध्यताम्" इति राज्ञश्चोदयन्, पश्यंश्च तान् स्वयमेव पाशैर्बद्धान्निपतितान्, "विद्ध्यामि कुहकं त्वां कार्मुकेण" इति सशपथं धनुरानेतुं निश्चक्राम ॥

अनुचितभाषिणं दर्पान्धं तं निग्रहिष्यन् कोपाविष्टो वासुदेवस्स्मृतोपस्थितं सुदर्शनं प्राचोदयत् । स तु विमृश्य देवं व्यजिज्ञपत् ॥

महीभारापनयनं कर्तुं जातस्य भूतले ।
अस्मिन्नेवं गते देव ननु स्याद्विफलः श्रमः" इति ।

एवमुद्बोधितो वासुदेवस्तद्वाक्यमभिनन्द्य तं विससर्ज । भगवतः क्षोभमवेत्य समापतितान् शार्ङ्गकौमोदकीपाञ्चजन्यनन्दकान् वरायुधान् सरभसमुपसर्पन्तं च तार्क्ष्यं मार्ग एव प्रशान्तरोषं भगवन्तमावेद्य सुदर्शनः प्रतिनिवर्तयामास ॥

अथ निष्फलदूत्यश्रमं निर्जिगमिषुं वासुदेवं धृतराष्ट्रः प्रविश्य पादयोर्निपत्य पुत्रापराधस्य कृते क्षमापयामास । तेन चार्घ्यपाद्यादिनोपचरितः प्रतिगृह्य प्रसन्नो वासुदेवस्स्वशिबिरं प्राप ॥

॥ दूतघटोत्कचम् ॥

अथ प्रवर्तमाने महति कुरुपाण्डवसम्पराये अन्तरा छलमाश्रित्य भीष्मो निहतः पाण्डवैरिति जातरोषा धार्तराष्ट्रास्संशप्तकानीकानुद्रवणेन असन्निहितयोर्जनार्दनधनञ्जययोः एकाकिनस्समरमवतीर्णस्य प्रक्षोभयतः सर्वराजमण्डलं सौभद्रेयस्य वधेन वैरनिर्यातनमगच्छन् । येन दुर्योधनो "मर्मसु प्रहृतमर्जुनस्य उन्मूलितो जनार्दनस्य मदः निरस्तप्राया रिपवः सञ्चालिता पाण्डवजयश्रीः यद्द्वितीय इवार्जुनोऽसावबालपराक्रमो बालो निहत" इति साभिमानं ननन्द ॥

श्रुतपौत्रकवधवृत्तान्तस्तु गान्धारीजानिरतिमात्रसन्तापलक्ष्यहृदयो निजपक्ष्यान्धर्मविघातिनो भृशमकुत्सयन् । तदात्वे च अभिवन्दनागतान् दुर्योधनदुश्शासनशकुनीनाशीर्वचनेनाप्यनभिनन्दन्नसौ शुशोच । "अहह ! शिशुवधपातकिनामस्माकं नूनं वंशक्षयो भावी । अविषह्यपराक्रमो गाण्डीवी जनार्दनप्रतुन्नः किन्न कथाशेषतान्नेष्यति कुरुकुलप्ररोहानपि । एकपुत्र्या मे दुश्शलायाः बान्धवानां भवतां प्रसादात् वैधव्यमासन्नमिव पश्यामि । यदभिमन्युवधनिमित्तीभूतेन जयद्रथेन पार्थमार्गणानां आत्मा

प्रथमलक्ष्यीकृतः। हन्त एकस्मिन्नसहाये बाले समुपेत्य प्रहरतां बहूनां क्षत्रबन्धूनां कथं न पतिता भुजा" इति ॥

अथ कर्णे अर्जुनप्रतियोद्धारमुपन्यस्य दृप्यतः सुयोधनस्य स्वपक्षपराक्रमे महतीं सम्भावनां अवधीरयन्नुवाच धृतराष्ट्रः— "दहनेन्द्ररुद्रेभ्यः प्रतिपन्नावन्ध्यास्त्रदुराधर्षः क्व स फाल्गुनः क्व चासौ तपस्वी व्याजोपलब्धविफलास्त्रबलः प्रमादी कर्णः। सर्वथा पुत्रवधामर्षितस्य पार्थस्य वैराग्निरस्मान् धक्ष्यति" इति ॥

तदात्वे समुत्थितस्य महतः शङ्खपटहसिंहनादरवोन्मिश्रस्य शब्दस्य प्रवृत्तिमुपलब्धुमादिष्टो भटः प्रविश्य व्यजिज्ञपत्। "संशप्तकानीकानपवाह्य प्रतिनिवृत्तः पार्थो निहतं पुत्रमङ्कस्थमश्रुभिः परिषिञ्चन् जनार्दनावभर्त्सितः—

येन मे निहतः पुत्रः तुष्टिं ये च हते गताः।
श्वः सूर्येऽस्तमसंप्राप्ते निहनिष्यामि तानहम् ॥ इति

क्रूरां प्रतिज्ञामाददे। तद्व्यवसायतुष्टैः पार्थिवैः प्रहर्षात् कृतेन सिंहनादेन भूरपि चचाल। अम्बराच्च पेतुः प्रज्ज्वलन्त्यः उल्का" इति ॥

तच्छ्रुत्वा निहतमेव जयद्रथं मत्वा व्यसनार्णवे निमज्जन्तं पितरं पर्यवस्थापयन्नाह सुयोधनः। "ननु प्रतिज्ञा व्याघाते प्रयत्नमातिष्ठामि। द्रोणोपदेशेन अभेद्यरूपं व्यूहं संयोजयित्वा आच्छादयिष्ये जयद्रथम्। यावत्सूर्येऽस्तमिते अप्राप्तकामास्ते पाण्डवाः खिन्नाः ज्वलनं विशन्ति" इति ॥

अस्मिन्नन्तरे भगवता चक्रायुधेन कौरवशिबिरं प्रत्यभिमन्युवधमधिकृत्य ग्राहितसन्देशः प्रेषितो घटोत्कचः व्योममार्गेण क्षणादागत्य धृतराष्ट्रस्य प्रणतिपूर्वकमात्मानं न्यवेदयत् । सादरदत्तश्रवसं च तमाश्रावयामास जनार्दनसन्देशम् । "अभिमन्युनिधनादविषह्यमन्युश्शतमन्युसूनुस्सक्रोधव्यवसायस्सर्वक्षत्रियविनाशाय गाण्डीवं धरिष्यति । तत्साम्प्रतमात्मनि धृतिमाधत्स्व, यथा ते पुत्रशोकसमुत्थितोऽग्निर्न दहेत्प्राणमयं हविः" इति । अथ सुयोधनं प्रत्युवाच च—"भवतापि श्रोतव्योऽयं जनार्दनस्य सन्देशः यथा तनयविनाशसमादीपितक्रोधस्योद्यतोग्रास्त्रस्यार्जुनस्य समरमुखे न कश्चिन् अजय्यः । तदवगच्छ प्राप्तं क्षत्रियाणां विनाशम्" इति ॥

तदा "अरे राक्षसोग्रस्वरूप ! कथं मर्यादामतिलङ्घ्यास्मत् पुरतः रूक्षमेवं वदसि ?" इति दुश्शासनेनाधिक्षिप्तः हैडिम्बेयस्सावहेळमाह, "राक्षसेभ्योऽपि भवन्तः क्रूरतमाः, येषां जतुगृहदीपनकृष्णावमर्शनबालहननादीनि वीरलोकविगीतानि अपदानानि" इति । तमाह सावज्ञं सुयोधनः—"परुषं वदन्नपि दूत इति घृणास्पदं भवान्" इति । तेन च हैडिम्बेयः तथा चुक्रोध यथा धृतराष्ट्रो यदि नावारयिष्यन्नूनं साहसमकरिष्यत् । संस्तभ्य च रोषं कः प्रतिसन्देश इत्यनुयुञ्जानस्सुयोधनेनागादि "हास्यमेतत् यत् पार्थेनैकेन वः प्रभुः कृत्स्नं राजमण्डलं निहतं वेत्ति । किं वाङ्मात्रेण वसुन्धरा जीयेत । छिद्यतां बहु भाषणम् । तिष्ठत्वाजिभूमौ । सायकैस्तस्य प्रतिवचो दास्यामि" इति ॥

तद्वचोऽनुसन्धाय घटोत्कचो धृतराष्ट्रमापृच्छ्य "भो भो राजानः! श्रूयतां जनार्दनस्य पश्चिमसन्देशः, "श्वः कृतान्तो वः पाण्डवरूपधारी सूर्यांशुभिः सममुपैष्यति" इति । तस्मात् जाग्रत" इत्युच्चैर्घुष्यन् शिबिरान्निर्जगाम ॥

॥ कर्णभारः ॥

अथ तुमुलीभूते सङ्ग्रामे, पक्षद्वयाश्रयेष्वप्यसङ्ख्येषु महावीरेषु सङ्ख्यनिहतेषु, विमुक्तसिंहनादैर्नरपतिसिंहैः परिवृतश्चतुरङ्गं महाबलं बलमनुविकर्षन्, युधिष्ठिरपराजयक्रुद्धो, विहितारातिविजयो विजयस्समरभुवमवातरत् । तमभियोद्धुं दुर्योधनप्रियचिकीर्षया, उद्धृतविपक्षशल्यस्सशल्यो निर्जगामाङ्गराजः । काममप्रतिहतपराक्रमो युद्धधौरेयः कर्णः, तदात्वे कमपि हृदयपरितापमुवाह । यदसौ मातृवचन-निवारितमात्मानमनुस्मृत्य, "कथं स्वावरजेष्वेव प्रहरामि" इति अनुक्रोशेनास्त; यच्च, "नाहं क्षत्रिय" इत्यतिसन्धाय विद्याग्रहणात्कुपितस्य गुरोर्जामदग्न्यस्य शापान्निर्वीर्याणीवालक्ष्यन्त काले सुशिक्षितान्यप्यस्त्राणि, दैन्येन प्रतिनिवर्तनमिव सूचयामासुर्गजतुरङ्गमाः, शङ्खदुन्दुभयश्च निश्शब्दतामगमन् ॥

तथापि—

हतोऽपि लभते स्वर्गं जित्वा तु लभते यशः ।
उभे बहुमते लोके नास्ति निष्फलता रणे ॥

इति कथञ्चित् धैर्यमास्थाय निसर्गकवचकुण्डलमहिम्ना अप्रधृष्यः कर्णो मद्रराजगृहीतप्रग्रहं रथमर्जुनाभिमुखं वाहयामास ॥

तस्मिन्नवसरे ब्राह्मणरूपेण प्रविश्य शक्रस्तस्मान्महत्तरां भिक्षां ययाचे । "भगवन्, किं काञ्चनाञ्चितशृङ्गं गोसहस्रं ते ददामि । अथवा काम्भोजप्रभवमनिलसमवेगमश्वीयं ते विसृजामि । उत गिरिनिचयोन्नतिमन्मत्तवारणयूथं स्पर्शयामि ।" इति सप्रणामं तमुदारमतिरुदाजहार कर्णः । एतेषु निरपेक्षं विप्रवरं दृष्ट्वा स वदान्यमूर्धन्यः, "किमपर्याप्तः कनकनिचयोऽभिमतः । किमखिलां पृथ्वीं जित्वा ते ददामि । किमग्निष्टोमफलजिघृक्षा । नेच्छसि चेत्सर्वमेतत् किं मच्छिर एव ते प्रार्थनीयं भवेत् । अथान्यदपि श्रूयताम्—

अङ्गैस्सहैव जनितं मम देहरक्षा
देवासुरैरपि न भेद्यमिदं सहास्त्रैः ।
देयं तथापि कवचं सह कुण्डलाभ्यां
प्रीत्या मया भगवतो रुचितं यदि स्यात् ॥"

इति सानुनयमभ्यभाषत । सद्यो "ददातु ददातु" इति कपटभूसुरस्सोऽयाचत । तदात्वे तस्मिन् जातशङ्कोऽपि कर्णो दानशौण्डीरतया "धिगयुक्तमनुशोचितुम् । न प्रतिज्ञामपलपामि ।

अपि च पात्रेषु यद्दत्तं तन्न शुष्यति, नापक्षीयते, न विपर्यस्यति कालेनापि । तत्तुष्यत्वेष ब्राह्मण:" इति सत्र्यवसाय: कवचकुण्डले आत्मनो देहान्निकृत्य तस्मै प्रादात् । गृहीत्वा चार्जुनपक्षपाती निश्चक्राम मघवा ॥

कर्णस्त्वनुपदमेव विदितयाथार्थ्योऽपि,—

"अनेकयज्ञाहुतितर्पितो द्विजै:
किरीटिमान् दानवसङ्घमर्दन: ।
सुरद्विपास्फालनकर्कशाङ्गुलि:
मया कृतार्थ: खलु पाकशासन: ॥"

इति परां परितोषतुलामारुरोह । न पुनर्वञ्चितोऽहमिति शुशोच ॥

अथ पश्चात्तापस्पृष्टहृदयेन पुरन्दरेण पाण्डवेष्वेकपुरुषवधार्थममोघमस्त्रं विमला नाम शक्तिर्दैवदूतद्वारा कर्णाय प्रदिष्टा । तां प्रतिगृह्य, "अफल्गुवीर्यस्स फाल्गुनो यत्र, तत्र प्रचोद्यतां रथ:" इति शल्यं सन्त्वरयन् युद्धप्रस्थानमकरोदङ्गराज: ॥

॥ ऊरुभङ्गः ॥

अथ रणाहतगजाश्वनरेन्द्रयोधसङ्घसमाकीर्णे, पिशितासृक्पूरपर्याप्तपारणालुब्धविहङ्गमभ्रमणोड्डामरावकाशे, शङ्कुप्रासासितोमरभिण्डिपालशूलमुसलमुद्गरगदादिभिरायुधशतैराचिततले, नृत्यत्कबन्धे, विरुवच्छिवाशिवध्वनौ, त्रस्ताधोरणतया विद्रवन्मत्तहस्तिनि, सूतप्रणाशप्रचलितहयापवाहितस्यन्दनशताकुले, रुधिरासारकलिलप्रदेशे, प्रतिभयतामावहति समन्तपञ्चके, विपन्नागण्यराजन्यमण्डले क्षीणप्राये च उभयपक्षे, द्वैपायन-हलायुध-कृष्ण-विदुरप्रमुखानां कुरुकुलदैवतानां प्रत्यक्षमन्योन्यवीर्यस्पर्धिनोरतिचिरसञ्चितामर्षदुस्सहाग्रहयोस्सुयोधनवृकोदरयोः प्रावर्तत महान् गदाविग्रहः। सुशिक्षितमल्ललीलाविशेषविचित्रिते बहुप्रकारप्रवृत्ते च तस्मिन्, अन्तरा निर्भिन्नाग्रललाटवान्तरुधिररूषितः भग्नांसकूटः सुयोधनगदाप्रहारशिथिलीकृताङ्गो निपपात भीमसेनः। तादृशं तं उपहसन्नाह धार्तराष्ट्रः, "न खलु, भीम, दीनं निहन्ति वीरस्समरेषु। तन्मा भैषीः" इति। एवमुपहस्यमानं भीमं दृष्ट्वा कृष्णः स्वमूरुमभिहत्य कामपि संज्ञां प्रायच्छत्। तया संज्ञया समाश्वासितः प्रत्यागतप्राणसारो मारुतिर्गदां प्रगृह्य सहसोत्थितः गर्जन् धर्ममनादृत्य अनवेक्ष्य च समयं सुयोधनोर्वोः भयदां गदां

मुमोच । तेन च जर्जरोरुः प्रस्रवद्रुधिरोपसिक्तभूतलः पपात कुरुराजः ॥

तदा दुर्योधनापेक्षया प्रतिपन्नक्रोधं हलायुधं दृष्ट्वा सम्भ्रान्तैः पाण्डवैः श्रमशिथिलाङ्गः भीमः सद्यः कृष्णकरावलम्बलम्भितगतिः अपावाह्यत । तस्मिन् अपक्रान्ते प्रबलामर्षसंरक्तलोचनः हलधरो राजानमभिवर्तमानः समुत्क्षिपन् हलमुदगर्जत् । "अत्र-धूयरणाभिसन्धिमनालोच्य च पुरस्थितं मां कथं भवान् भीमेन वञ्चितः । एष रिपुबलप्राणहरेण, कालिन्दीजलवर्त्मदेशिकेन लाङ्गलमुखेन केदारानिव विदारयामि पाण्डुपुत्रान् । प्रतिपालयतु भवान् क्षणमात्रम्" इति । अन्वतप्यत च भृशं रुधिरानुलिप्तच्छविं भूसंसर्पणधूलिधूसरितं अर्धोपरतैरङ्गैः भूमौ विवेष्टमानं पश्यन् तपस्विनं दुर्योधनम् । तमाह प्रसादं याचमानः सुयोधनः सानुनयं, "भगवन्, विमुञ्च रोषम् । जीवन्तु ते कुरुकुलस्य निवापमेघाः पाण्डवाः । अलं विग्रहकथया । प्रशाम्यतु वैरम् ।

"प्रतिज्ञावसिते भीमे गते भ्रातृशते दिवम् ।
मयि चैवं गते राम विग्रहः किं करिष्यति ॥"

अपि च यदहं जतुगृहात् आत्मनिर्वाहिणा हिडिम्बराक्षसमर्दनेन वैश्रवणालयप्रक्षोभिणा महाप्रभावेण भीमेन छलमाश्रित्यैव जितः तदहमद्यापि अजित एव । इदमपि पश्यतु भवान् । सर्वमेतल्लीलागोपकिशोरकस्य भगवतो नारायणस्य संविधानकमेव । किमत्रानुशोच्यते" इति ॥

अत्रान्तरे पुत्रशतवियोगशोकाभिभूतहृदयो धृतराष्ट्रः पुत्रदत्तमात्मनो निवापमसहमानं कृतान्तहतकं विगर्हमाणः "हा पुत्रक! क्वासि देहि मे प्रतिवचनम्?" इति अतिकरुणं रुदन् दुर्जयेन आदिश्यमानमार्गो दुर्योधनाभिमुखं अभ्यवर्तत। तमन्वास्ते स्म पतिधर्मचिह्नं नयनपट्टबन्धमजस्रैः अस्रैः आर्द्रयन्ती गान्धारी, प्रत्यासन्नवैधव्यदुःखतया अतिमात्रविक्लबहृदये देव्यौ च। अथानीशतया गात्राणामपहृतपित्रभिवन्दनस्वातन्त्र्यस्य, प्रकाशीकृतमूर्धजं रणाजिरप्रविष्टं अवरोधजनं च पश्यतः राज्ञो हृदये न ममौ मन्युपरिवाहः। तदा बालभावादज्ञातसमयविशेषदौरवस्थ्यं परिचितविधिना स्वमङ्कमारोहन्तं दुर्जयमसह्यवेदनतया सहसा निवारयन्नातिमात्रं विषादेनान्तरदह्यत स पुत्रवत्सलः। निरतिशयसन्तापकारिणीं एतादृशीं दुर्गतिमापन्नं तनयमुपसृत्य धृतराष्ट्रः शतमुखप्रवृत्तदुःखप्रवाहः शोकाम्बुलुलितलोचनतया पुनरुक्तान्ध्यः भूमौ पतित्वा करुणतरं विललाप। तमाश्वासयन्नाह कुरुराजः, "त्वत्पादमात्रप्रणतमौलिरपरिक्षतेन मानेनैवापराङ्मुखो हतस्तव सुत इति शोको निगृह्यताम्। क्रियतां मयि अनुग्रहः" इति। अथ मातरमाभाष्य, "यदि पुण्यं मया कृतं त्वमेव अन्यस्मिन्नपि जन्मनि मम जननी भवितुमर्हसि" इत्यवदत्॥

क्रमेण च शोकार्तमवरोधजनं यथोचितं पर्यवस्थाप्य स्निग्धं आहूय पुत्रं, "अहमिव पाण्डवाश्शुश्रूषितव्याः। कुन्त्या

निदेशे वर्तस्व । द्रौपदी सुभद्रा चोभे मातृवत्पूजयितव्ये । मन्नामावसाने युधिष्ठिरं स्पृशता त्वया तेन सह मम निवापो देयः" इत्यादिक्षत् ॥

तदात्वे मूर्तिमानिव वीरो रसः ससम्भ्रमं कार्मुकहस्तः प्रविश्य द्रौणिः अखण्डितपराक्रमैः भीष्मद्रोणादिभिराश्रितनिजपक्षमपि निजवाक्योन्मुखैकादशवाहिनीपरिरक्षितमपि छलजितमासन्नमृत्युमभिहतगजतुरगनररथप्राकारमध्यपतितं कुरुराजमभिवीक्ष्य क्रोधव्यलीकाभ्यां पर्यायोपतप्तहृदयः स्तोकावशेषे कुरुकुले प्रशाम्यन्तमपि युद्धदावानलं वैरनिर्यातनार्थं पुनरुज्ज्वलयिष्यन् धीरमेवमुदगर्जत् । "भोः कुरुराज! अद्य समुन्नतास्त्रः निशासमरमुत्पाद्य रणे धक्ष्यामि पाण्डवान्, आपततु वा स्वयमेव कृष्ण आविष्कुर्वन् चतुर्भुज-शङ्ख-चक्रादिलक्षणं गरुडे निविष्टं निजं रूपम्" इति ॥

अथ मा मा भवानेवं—

"गतं धात्र्युत्सङ्गे सकलमभिषिक्तं नृपकुलं
गतः कर्णस्स्वर्गं निपतिततनुश्शन्तनुसुतः ।
शतं भ्रातृणां मे हतमभिमुखं संयुगमुखे
वयं चैवं भूता गुरुसुतधनुर्मुञ्चतु भवान् ॥"

इति सुयोधननिवारितसम्भ्रमोऽपि, "सर्वथा कृतप्रतिज्ञोऽस्मि । अद्यैव ब्राह्मणस्य मम वचनात् पितृभुक्ते राज्ये दुर्जयो विना-

ऽभिषेकं राजा भवतु" इत्यहार्यनिश्चयो बभाषे । समनन्तरक्षण एव सुयोधनः पुरतः समुत्थितान् कुलपूर्वपुरुषान्, सकर्णं भ्रातृशतं, क्रुद्धं अभिमन्युं, महार्णवान्, अप्सरसश्च विभावयन्, कालेन प्रेषितं सहस्रहंसप्रयुक्तं वीरवाहिनं विमानमधिष्ठाय स्वर्गमारुरोह । ततो निर्विण्णो धृतराष्ट्रः पुत्रप्रणाशविफलं राज्यं परित्यज्य सज्जनाश्रयाणि तपोवनानि रोचयामास । अश्वत्थामा च सौप्तिकवधोद्यतपाणिस्सशपथं निरगात् ॥

इति प्रथमो भागः ।

द्वितीयो भागः।

॥ श्रीरामचरितम् ॥

यस्सत्ये गुरुमासयन्नुपनतां तत्याज राज्यश्रियं
यस्सन्तोषयितुं प्रजाः परिजहारापन्नसत्वां प्रियाम्।
तस्योपाश्रितकीशराक्षसपरित्राणप्रतिष्ठागुरो-
र्धर्मे सूक्ष्मगतौ जयत्यवनिजाजानेरभेद्या स्थितिः॥

(१)

आसीदशेषकल्याणनिलयेषु कोसलेषु अयोध्या नाम यथार्थाभिधाना राजधानी। तत्र च प्रमुदितप्रजावत्सलानां, प्रचण्डविक्रमाणां चण्डभानुवंशमहत्तराणां ललामभूतः पुलोमजा-रमणेनार्धासनप्रदानपूर्वकं सभाजितः, सुरासुरसङ्ग्रामेष्वप्यप्रतिहत-महारथो दशरथो नाम राजा लीलानुशासितमहीवलयस्सुचिरं व्यलासीत्। स च बहुवर्षसहस्राणि राज्यभारं निर्वाह्य परिखिन्न-स्सञ्जातजरावैक्लव्यो विषयव्यावृत्तकौतुकश्चरमव्रतमिक्ष्वाकूणां

वैखानसीं वृत्तिमाशिश्रयिषुः कुलामात्यप्रकृतिमण्डलानां सुचिरसंभृतकौतूहलमनुरुन्धानो वयःस्थं जनलोचनचन्द्रं रामचन्द्रं राज्यश्रिया सङ्गमयितुं तत्वरे ॥

अथाभिषेककृताभिमुख्यैर्वसिष्ठमुख्यैरुद्दिष्टे पुण्येऽहनि संप्राप्ते, प्रहृष्टनरनारीजना, संयोजितविशेषालङ्करणविधिपरिशोभमाना, समन्ततः प्रचलितोत्सवमङ्गला साकेतनगरी प्रतिक्षणं नूतनेव कामपि श्रियमुररीचकार । समाह्रियन्त च राजकुले तद्विधावसरोचितसम्भ्रमेणाभिषेकसंभाराः । तथा हि—समुदश्रायि सव्यजनं छत्रम् । अकल्प्यत सनन्दिपटहं भद्रासनम् । न्यस्यन्त च तीर्थाम्बुपूर्णास्सुवर्णघटाः । अयुज्यत पुष्यरथः । सन्न्यधीयन्त सामात्यपुरोहिताः पावनदर्शनास्सहस्रमवनीसुराः । एकप्रकारसंक्षिप्तास्सभायां पौरजानपदाश्च सममेल्यन्त । स च भगवान्वसिष्ठः कालोचितक्रियाकलापप्रत्यवेक्षणव्यग्रः पवित्रावकाशां वेदीमध्यतिष्ठत् । धुर्ये स्वतनये क्रमेण भुवनरक्षाधुरमवतारयिष्यति दशरथे तत्सौराज्येन चिरानुभूतस्वास्थ्योऽपि गुणपक्षपाती जनोऽकृतपूर्वं तोषमधत्त ॥

अथ परिणामोन्मुखमनोरथो दशरथस्सभायां स्निग्धतरमाभाष्य तनयमङ्कमारोप्य, साश्रुगद्गदं, "पुत्र, राम, प्रतिगृह्यतां राज्यम्" इत्युदाजहार । विनयाद्बहुमानाच्च तदप्रतिपद्यमानं चरणपतितं रघुनन्दनं निर्बन्धतः स्वमतमङ्गीकारयामास च । अथारब्धे पठहे, भद्रासनलङ्घिनि रामभद्रे शत्रुघ्नलक्ष्मणगृहीतो-

न्नमितेऽभिषेकघटे, छत्रे च स्वयं नृपतिना गृहीते, अन्तरा प्रविश्य मन्थराभिधाना सरभसमवनीपतेः कर्णे किमपि जजाप । यया किल सद्यो विघ्निताभिषेकमङ्गलया प्रफुल्लपौरजानपदमुख-राजीवे सदस्यकालोपनतनीहारवृष्टिलीला व्यधायि । दशरथोऽपि वज्रनिर्घातेनेव प्रक्षुब्धमतिस्सञ्जातशोकज्वरज्वालापरीतकरणस्स-वैक्लब्यमाहूय तनूभुवं कृच्छ्रेण विश्रमितुं विससर्ज । स तु प्रतिबद्धेऽपि राज्यलक्ष्मीप्रतिग्रहमहोत्सवे, अलोलुपतया, अति-गम्भीरतया, यथाभूतवदनोल्लासोऽभिवन्द्य पितरं दिष्ट्या स एवास्मि राम इति मोदमानो मैथिलीमिमं वृत्तान्तमधिगमयितुं धृतकौतूहलस्तदावसथमाससाद ॥

तत्र चाभिषेकवार्ताहारिणे चेटीजनाय परितुष्य प्रत्त-सर्वाभरणशून्यीकृताङ्गलतां, नेपथ्यपालनीमुपहसितुं अवदातिकया चेट्या चोरितोपहृतं वल्कलयुगळं कौतुकेन परिधाय, "किं मे शोभत" इति सखीजनमनुयुञ्जानां, तदात्वेऽप्यक्षीणलावण्य-सम्पन्मनोहरां हृदयदयितां दयितामालुलोके । कृतसम्भाषश्च तया क्षणं यावत्तिष्ठति तावत् "हा हा महाराज" इति नरनारी-जनस्य निर्मर्यादो महानार्तध्वनिः श्रोत्रपथमवातरत् ॥

ततस्सत्वरापतितः कञ्चुकी राज्यलोभाद्धरताभिषेकं याच-मानायाः कैकेय्याः कार्कश्यमभिचुक्रोध । निजपक्षपातेन गुरुजन-मपवदन्तं तमवस्थापयन् प्रत्याह राघवः—"आर्य, किमत्राक्रोश-स्थानम् ? गुणानेव पश्यामि मदभिषेकनिवृत्तौ ॥

वनगमननिवृत्तिः पार्थिवस्यैव तावत्
मम पितृपरवत्ता बालभावस्स एव ।
नवनृपतिविमर्शे नास्ति शङ्का प्रजानां
अथ च न परिभोगैर्वञ्चिता भ्रातरो मे ॥

अपि च—

शुल्के विपणितं राज्यं पुत्रार्थे यदि याच्यते ।
तस्या लोभोऽत्र नास्माकं भ्रातृराज्यापहारिणाम् ॥"

इति । समादिशच्च कञ्चुकिनं मातृपरिवादं विना महाराजवृत्तान्तं अभिधातुम् । श्रुत्वा च तन्मुखादतिसृष्टकैकेयीप्रार्थनं सद्यो मोह-मुपागतं राजानं नितरामखिद्यत ॥

तदनु धनुष्पाणिराविर्भूय क्रोधमूर्च्छितो लक्ष्मणः प्रक्षुब्ध इव प्रलयवारिधिरित्थमुदगर्जत् । "अहो बत क्षत्रियाणामपि क्षीणसत्त्वता । धिक् एते वयं विश्रुतवीरापदानाः प्रक्रान्तचापलया-प्यबलया केवलमेवं परिभूयामहे । तन्नालमस्याः पापाशया-याश्चिरकाङ्क्षितसङ्गमेऽप्यार्येऽभिनिविशमानां यदियमपचकर्ष निर्भ-रासूययेव राज्यश्रियम् । पश्यत लोभानुसूत्रिताया नृशंसताया विलसितम् । मणिमकुटधारणप्रसाधितेन शिरसा तन्मुहूर्त एव जाटामाबद्ध्य चतुर्दश वर्षाणि नाम वनमवनोचितेन भवनी-कर्तव्यम् । जराजर्जरमतिनाप्यवनीपतिना नियतिरिव दुर्व्यवस्थेयं केनाप्यसम्बद्धेन धर्मव्यवहारेणानतिक्रमणीयेति कृत्वा दुःख-दावानले निपात्यते ह्यात्मा । वयन्तु प्रचलितास्सद्यो युवतिरहित-

मेव भुवनतलमखिलमापादयितुम् । तिष्ठतु तावदार्यो यदि न सम्मन्यते । मुञ्चतु मां भवान् यतः कलितनिश्चयोऽस्मि" इति ॥

इति समारब्धसंरम्भभीषणं तमनुजन्मानं पेशलाक्षरैस्सान्त्वनोपक्रमैर्मातृनियोगप्रतिबद्धस्वातन्त्र्याणां पातकपर्यवसायिनः क्रोधस्यानवसरमुपदर्शयन्समाधाय रामचन्द्रस्तस्य हृदयोत्तापं शनैरशामयत् । उररीचकार च प्रशान्तगम्भीरे मनसि कनिष्ठमातुः प्रत्यक्षोदीरितनिर्विशेषमविलङ्घ्यरूपमनुशासनमुरुतोषेण ॥

अथ तदात्वोपनतान्सीताकौतुकवर्धनश्रद्धया नेपथ्यपालन्या स्वयं प्रेषितानन्याननुभूतान् वल्कलानात्मने रामः प्रतिगृह्य दुर्निवारानुगमनव्यवसायेन सौमित्रिणा सह विभज्य सत्वरं पर्यधात् । धृतारण्यकवेषश्चानपेक्षितगुरुजनामन्त्रणविधिर्मुहूर्तमवतिष्ठस्व वत्सेत्यतिकरुणमुल्लपन्तमापतन्तमपि तातं श्रुत्वा कान्तारगमनप्रत्यूहपरिजिहीर्षया दृढनिश्चयाऽऽकलनकठोरहृदयः क्षणमात्रमपि विलम्बमसहमानः प्रार्थितयापि प्रथमप्रतिपन्नचीरपरिधानमपरित्यजन्त्या प्रकाशितानुप्रवसनसिद्धान्तया कान्तया परिष्कृतपार्श्वस्सौभ्रात्रशेवधिना लक्ष्मणेन पुरो निर्दिश्यमानमार्गो दीनाक्रन्दनशरणपौरलोचनाम्बुप्रवाहोपसिक्तनीरजीकृतप्रतोलीं तदुपक्रममुत्सादितोत्सवाशंसां रघूत्तंसः पुरीमयोध्यामतिलङ्घ्य समचलद्विपिनाभिमुखम् ॥

निर्गते च सदारानुजे रघुनन्दने नरपतिः पतन्निव पतङ्गः शुष्यन्निव महोदधिः विशीर्यन्निव धरणीधरः पारे वाचामङ्कै-

राधिपरिक्षीणैः कार्पण्यमुद्वहन्नसह्यपीडेन हृदयावस्कन्दिना शोकशङ्कुनाऽतिकरुणमन्तस्संग्लपितः कौसल्यासुमित्राभ्यां स्वयं निगृहीतात्मशोकाभ्यामन्वास्यमानः चरमशय्यामधिशिश्ये । स तदानीमतिभूमिं गतेन चिन्ताव्याधिना शिथिलेन्द्रियमतिर्व्यथमानो विवशमनेकधा व्यचेष्टत । तथा हि—शश्वदाविष्टतीव्रमन्युपिशाचिकावेगादिव शयनादुत्थायोत्थाय न्यपतत् । मुहुर्मुहुः स्मृतिवशादाघट्टितहृदयनिखातकैकेयीदुर्वचनशल्य इव दुस्सहवेदनामनुभवन् हा हेत्युच्चैर्विललाप । परित्रायथितुमिवात्मान-मबलाव्यालीमुखात् पुनःपुना राम रामेत्याचक्रन्द । मृत्युपरिगृहीतस्य मे चरमदर्शनं वितरत पुत्रका इति पदे पदे भृशं परिदिदेव। परिपालितपितृसङ्गरो महाप्रभावोऽनया गर्भे धृत इति वारं वारमतिमानेन बहुमानेन प्रियवचनैः कौसल्यामन्वरुध्यत । पुत्रविवासनेन कृतापकारमात्मानं क्षमापयितुमिव दीनवदनस्तामसकृत् निश्वसन्नवलुलोके । धिङ्मां स्त्रीमतिपरिगृहीतं लोकोपहास्यं मन्दधियमिति विलज्जमान इव भूयो भूयो मोहमहातमसि निलिल्ये । निसर्गाऽनुकम्पिनापि प्रियनन्दनेन निरनुक्रोशमुपेक्षितस्य मम कोऽर्थो जीवितेनेति वैराग्यादिव शोकदावानले प्राक्षिपत्स्वमात्मानम् ॥

तस्य च तदा निरतिशयतनयविरहानलपरिप्लुष्टहृदयस्यानारतं प्रमुह्यतः प्रतिबोधं विना कौसल्यासुमित्रयोरपि प्रत्यभिज्ञा दुश्शकैवासीत् । अदृश्यभूते लोचनसुधाकरे रामचन्द्रे विसृत्वरतमो निमीलितमिव नयनयुगलमन्धीबभूव । रामान्वेषणप्रस्थितेव प्रयत्नावस्थाप्यमानापि बुद्धिः स्वनियोगाद्भ्रंशे ॥

एवमप्रतीकारायां दशायां वर्तमानं सकृत्कृतान्तमुपालभमानं सकृदात्मानमेव दुष्कृतकारिणं कुत्सयन्तं, कदाचित्कैकेयीं विगर्हयन्तं भूयस्सस्नेहशोकं पुत्रकानाहूयोन्मत्तवद्बहुप्रलपन्तं अतिकरुणदर्शनं, पार्थिवं रामसकाशात्प्रतिनिवृत्तस्सुमन्त्रस्सविषादमुपगम्य व्यजिज्ञपत्—"देव, शृङ्गिबेरपुरं प्राप्य ते महाराजस्य प्रणाममावेद्य कमप्यर्थं विज्ञापयितुमारभमाणा बाष्पस्तम्भितकण्ठत्वान् किमप्यनुक्त्वैव वनोदरमविशन्" इति । तच्छ्रुत्वा महीपतिः कैकेय्या दुराग्रहानुचिन्तननिष्पीडितहृदयः—

गतो रामः प्रिय तेऽस्तु त्यक्तोऽहमपि जीवितैः ।
क्षिप्रमानीयतां पुत्रः पापं सफलमस्त्विति ॥

सावेगाक्रोशमुदीरयन् निजपुत्रकाणां पुनरवलोकननैराश्याद्द्विगुणीभूतमोहोपहतचेतनः प्रतिक्षणं परिशुशोच । अन्ततः स्वमाश्वासयितुमिवोपागतैः तत्क्षणप्रत्यक्षितैः दिलीपाजमुख्यैः पितृभिरुपच्छन्दितमात्मानं सम्भावयंस्तैस्सञ्जिगमिषुः "अयमहमागच्छामि" इति वचसैव मूर्च्छया परामृष्टः स क्षणाद्दिविषदवसथमारुरोह ॥

अनन्तरमराजकोपहतमिक्ष्वाकुजनपदमवलोक्य विधिज्ञैर्वसिष्ठानुमोदितैरमात्यमुख्यैर्दशरथवचनमर्थवत्कुर्वद्भिः आबाल्यान्मातुलकुले वास्तव्याय भरताय प्रेषितस्ससूतो रथः । स च, दृढमकल्यशरीरो महाराज इति केवलमाश्रावितनिजोपप्रेषणहेतुस्सूतेन बलवदुत्कण्ठितस्त्वरितं अयोध्यापरिसरमुपासीदन्, "एकनाडिकां यावत्प्रतिपाल्य प्रतिपन्नायामेव रोहिण्यां पुरीं प्रवेक्ष्यति

कुमार इत्युपाध्यायेन विज्ञापित: क्षणं विश्रमितुकाम उपान्तिके वृक्षान्तराविष्कृतं देवकुलं प्रविवेश ॥

तत्र च विश्वसनीयमानुषभावानां चतु:प्रतिमानां स्तोममालोक्य नमितशिरा वन्दितुमुपक्रामन्नसौ सहसोपेतेन देवकुलिकेन, "क्षत्रिया ह्यत्र भवन्तो, न भवादृशस्य प्रणामार्हा" इत्यवार्यत । अथ विस्तरं पृष्टस्स देवकुलिको, यावत्तिस्र: प्रतिमा दिलीपरघ्वजानामिक्ष्वाकुकुलपूर्वपुरुषाणान्नामतो निर्दिश्य दशरथाकृतिसंवादिनीं तुरीयामुपासीदति तावत्पर्याकुलो भरत:, "किं धरमाणानामपि प्रतिमा: स्थाप्यन्ते" इति तं पर्यपृच्छत् । सोऽवदत्—"न खलु । अतिक्रान्तानामेव" इति । अत:परं श्रोतुमक्षमो भरत: कमप्यत्याहितमापतितमाशङ्कमानो यदा सरभसमपचक्राम तदा देवकुलिक: क्रूरमेवमभाणीत्—"तिष्ठ,

येन प्राणाश्च राज्यं च स्त्रीशुल्कार्थे विसर्जिता: ।
इमां दशरथस्य त्वं प्रतिमां किन्न पृच्छसि ॥" इति ।

श्रुत्वैवं अशनिहत इव मुमूर्च्छ कैकेयीसूनु: । अथ प्रतिबुध्य, तादृशावस्थाविशेषेण स्वं कैकेयीपुत्रं प्रत्यभिजानत: तस्य मुखादेव शुल्कलुब्धया स्वजनन्या ससीतालक्ष्मणमरण्याय निर्वासितं राममवगत्य, "कथं कथमार्योऽपि वनं गत: ? किमहमुपहतभागधेय: पित्रा भ्रात्रा च वर्जितामटवीभूतामयोध्यां पिपासार्त्त: क्षीणतोयामिव नदीमनुधावामि ?" इति शोचन् स द्विगुणितमोहाभिभूतचेतन: निस्संज्ञ: पपात भूपृष्ठे ॥

तत्क्षणमुपतस्थे तत्र सुमन्त्रोपदिष्टमार्गं दशरथप्रतिमा-दिदृक्षया कौसल्यापुरोगमन्तःपुरम्। तदा देवकुलिकेन निर्दिश्य-मानावस्थं भरतं प्रत्यभिजानन्त्यः परिवार्य देव्यः पर्यदेवयन्। अथ मातृकरावमर्शोपलब्धस्वास्थ्यो भरतस्समाश्वस्य सुमन्त्र-निर्दिष्टनामधेये कौसल्या—सुमित्रे अभिववन्दे। कैकेयीं पुनरव-लोकितुमपि नैच्छत्। किञ्च निपातिता वयं सान्वयास्सपौर-जानपदास्सर्वे भर्तृद्रोहिण्या नृशंसया त्वयेति तां भृशमधिचिक्षेप। अथ च, "जात, किं मया कृतम्? महाराजस्य सत्यवचनं रक्षन्त्या मया तथोक्तम्। तत्रापराध्यति ते शुल्कलुब्धो मातामह" इति प्रक्रान्तसान्त्वनां कैकेयीमभिक्रुद्धो भरतः—"कथं शुल्के सभार्यस्यार्यस्य वनवासोऽप्युदाहृतः। यदि ते राज्यफलतर्षः, किं नरेन्द्रो न दद्यात्। किमर्थं मन्नाम कीर्तयित्वा मामयशस्तमस्य-काण्डे पातितवत्यसि। कष्टं कृतं भवत्या। म्रियमाणः पतिर्न गणितः। दयिततनयाः क्रोशन्त्यो नानुकम्पिताः मातरः। कृत्स्ना-प्ययोध्या रोदनशरणा नावेक्षिता। न गणितोऽप्यात्मा धिगिति वचसा लोके समाकृष्टः। अहो धात्रासृष्टं भवत्या हृदयं वज्र-कठिनम्। धिक् त्वां दुष्करकारिणीम्" इत्यवभर्त्सयन् तस्या न प्रससाद। अभिषेकमधिकृत्य च सह प्रकृतिभिः प्रत्युद्गम्य वसिष्ठ-वामदेवाभ्यां विज्ञापितो, "राज्यलुब्धायै इहात्र भवत्यै प्रदी-यताम्" इति निष्ठुरमुक्त्वाऽप्रविशन्नेवायोध्यां रामतपोवनमभि-प्रतस्थे॥

समुपगम्य च चित्रकूटाचलोपरचितां भ्रातुः पर्णशालां कैकेयीचापलात्सङ्क्रान्तकृतघ्नभावमिव स्वं मन्यमानो लज्जमानमानसो भरतो दूरादेवोपावर्तमानस्समुपस्थितमात्मानं सविगर्हमुदघोषयत् । तदा स्पष्टघनेन हृदयानन्दनेन बन्धुजनबहुमानावहेन तस्य तेन स्वरसंयोगेन स्नेहपरिक्लिन्नहृदयो रामस्सौमित्रिं पुरुषविशेषमवधारयितुमभ्यचोदयत् । तद्वचनेनाभिमुखापतितं लक्ष्मणं निजाग्रजं सुमन्त्रेण निवेद्यमानं कैकेयीसूनुर्यथोचितमभ्यवादयत् । अथ लक्ष्मणमुखाद्विदितनिजागमनं राघवं, मैथिल्या सादरं प्रत्युद्गम्य प्रवेशितो भरतस्सभक्तिविनयमुपसृत्य स्वनामनिवेदनपूर्वकं प्रणनाम । तदानीं रामभद्रः प्रेमदृढमेनमाश्लिष्य, सुमन्त्रं च दृष्ट्वा तातव्यपायाश्रितया कथया प्रकीर्णबाष्पपूरश्शोकव्याकुलितेन्द्रियस्सुचिरमवतस्थे ॥

अनुपदमभ्याश एव स्थातुकामं भरतं, “वत्स, पालनधर्माणो वयमिक्ष्वाकवः । तदनुचितमिहावस्थातुम । अपि च भवद्विधं श्लाघ्यगुणं पुत्रमुत्पाद्य किं नाम नः पिता मिथ्याभिधायी भवतु । यस्य किल वाक्यमवितथीकर्तुमेवाहं वनभुवमुपागमम् । सत्यधनं हि नः कुलम् । कथं भवानन्यथा प्रवर्तते । तत्सत्वरं निवर्तस्व परिरक्षितुं स्वराज्यम्” इति निरुत्तरमशासत् । तदाज्ञावशंवदो भरतो व्यजिज्ञपत्—“आर्य, तेन हि मम हस्ते निक्षिप्तं तव राज्यं चतुर्दश वर्षान्ते त्वां प्रतिग्राहयितुमिच्छामि । अन्यच्च, प्रसादयतु मह्यमार्यः पादोपभुक्ते इमे पादुके । अत्रैवा-

भिषेकोदकमावर्जयित्वा अनयोर्विधेयस्सन् भवदागमनावधि परिपालयिष्ये भुवनम्" इति ॥

ततः प्रीतेन भ्रात्रा सबहुमानं प्रसादीकृते पादुके गृहीत्वा, समापृच्छय च स्नेहविक्लबमाश्रमद्वारावधि विहितानुयात्रं बन्धुजनं, भरतो, "हन्त भोः, अद्यैवास्मि,—

श्रद्धेयः स्वजनस्य पौररुचितो लोकस्य दृष्टिक्षमः
स्वर्गस्थस्य नराधिपस्य दयितश्शीलान्वितोऽहं सुतः ।
भ्रातृणां गुणशालिनां बहुमतः कीर्तेर्महद्भाजनं
संवादेषु कथाश्रयो गुणवतां लब्धप्रियाणां प्रियः ॥

इति परितुष्यन्, प्रकामं विशदान्तरङ्गः सुमन्त्राधिष्ठितं रथमारुह्य अयोध्यामभिप्रतस्थे ॥

(२)

अथ कदाचिद्दूरापाये वनप्रवासे भ्रातुरुद्घातपरम्पराश्रवणेन निस्सहपरीतापप्रदग्धहृदयं साक्रोशनैष्ठुर्यं निजोपालम्भप्रवृत्तं भरतं, भवितव्यतायाः प्राबल्यमुपदर्शयन्ती, तथाऽध्यवसितदैवपारतन्त्र्येणोपहतचेतसो निमित्तमात्रभूतायाः स्वस्या अनपराद्धतायां प्रत्याययन्ती च, सानुनयं, सुमन्त्रानूदिता कैकेयीत्थमुपन्यास्थच्चिरकाङ्क्षितोद्घाटनावसरं, निजवरद्वयाऽऽदानप्रवर्तकं, अनन्यथाभवं दशरथस्य शापम् । "पुरा किल मृगयां गतेन महाराजेन

कस्मिंश्चित्सरसि कलशं पूरयमाणो, वनगजबृंहितानुकारिशब्द-समुत्पन्नवनगजशङ्कया विपन्नचक्षुषो महर्षेश्चक्षुर्भूतो मुनितनयश्शब्दवेधिना शरेण हिंसितः । तेन च सत्यभाषिणा महर्षिणाऽविषह्येन पुत्रव्यपायव्यलीकेन प्राणान्परित्यजता शप्तो महाराजः —"त्वमप्येवं पुत्रशोकाद्विपत्स्यसे," इति तत्र च मामपराधे निक्षिप्य दैवेन पुत्रको रामो वनं प्रेषितः । तन्मां न राज्यलुब्धां मन्तुमर्हसि । अपरिहरणीयो मुनिशापः पुत्रविवासनं विना कथं विरमति । किं च मातुलकुले वर्तमानस्य ते प्रकृतिभूतो विप्रवास इति राम एव प्रव्राजयितव्य आसीत् । यत्किल चतुर्दशदिवसा इति वक्तुकामया पर्याकुलहृदयया चतुर्दशवर्षाणीति मयोक्तं तदपि दैवतन्त्रकमेव" इति ॥

तदा तत्सर्वमनूद्य सुमन्त्रः पुनर्न्यवेदयत्—"कुमार, वसिष्ठ-वामदेवप्रभृतीनां सर्वमेतद्विदितमनुमतं च" इति । तच्छ्रुत्वा विश्वस्तहृदयो भरतो, "हन्त त्रैलोक्यसाक्षिणः खल्वेते । यद्यनुमतं तेषां नात्र विचारणाया अवसरः । दिष्ट्या अनपराद्धात्र भवती" इत्युक्त्वा भ्रातृवात्सल्यादुत्पन्नमन्योः स्वस्यापराधान् क्षमापयित्वा च मातरमभिववन्दे । अजहच्च तदादितस्तां प्रत्यन्यथाग्रहणेन सुचिरसम्भृतं हृदयकालुष्यम् ॥

अथायोध्यारक्षामुपदिश्य निवर्तिते भरते, दक्षिणाशाविस्तीर्णेष्वरण्यभागेष्वविरलमास्तीर्णानामाश्रममण्डलानां दर्शनकुतूहलिना, वृद्धोपसेवाहेवाकिना च मनसा, ससीतालक्ष्मणो

दाशरथिश्चित्रकूटाचलात्प्रचचाल । गच्छंश्च मार्गोपरोधिनं विराधं दण्डकारण्यप्रवेशनान्दीमुखोपहारतां नीत्वा, प्रशान्तचित्रविभूतिष्वाश्रमपदेष्वासेवमानो निजदर्शनोत्सुकिनः सत्याशिषश्शरभङ्गप्रभृतीनमिततेजसो महर्षीन्, प्रतिश्रुत्य च तेषां निश्शेषपिशिताशनशल्यनिर्हरणं, स क्रमेणातिलङ्घ्य नानामृगगणाकीर्णे नदनदीशतैरन्तरा सीमन्तितमतिरमणीयसमृद्धिदर्शनीयतमं सुदूरं वनगहनमार्गं, अन्ततः प्राप कुम्भोद्भवोपदिष्टं, खरप्रमुखक्रूरक्रव्यादपातकाधिष्ठानं जनस्थानम् । तत्र च गोदावरीमारुतोपवीजितायां पञ्चवट्यां, लक्ष्मणोपरचितं, जनकनन्दिनीकरकमलोपात्तकलशांबुसेकपरिवर्धितावन्ध्यतरुषण्डोपशोभितं, अयोध्यानिर्विशेषोपभोग्यमाश्रमपदमश्रमेण चिरमध्युवास ॥

तत्रैकदा दुरभिनिविष्टशूर्पणखाविरूपकरणप्रधर्षणेनामर्षितं चतुर्दशसहस्रमितराक्षसानीकमूर्धन्यं, सदूषणत्रिमूर्धानं कृताभिषेणनं खरमेकाकी रघुनन्दनो मुहूर्तात्कथाशेषतामुपनिन्ये । अनेन च, निरवशेषजनस्थानरक्षोबलप्रमाथसंरम्भेण सम्भाव्यमानविक्रमक्रमदुराधर्षं रघुवीरमन्तरेण सन्धुक्षितस्य वैरानलस्य, निस्तुललावण्यलेखाभिनिवेशिनः कदर्थयतः कन्दर्पतर्षस्य च, युगपत्प्रतीकारविधेः कुहनासम्प्रदायेन जानकीहरणमेवौपयिकं निश्चित्य लङ्केश्वरः, कदाचित्तीर्थयात्रातः प्रतिनिवर्तमानस्य कुलपतेः प्रत्युद्गमनसमुदाचारेणासन्निहिते लक्ष्मणे, स्वयमुपहृतसलिलानुकम्पितबालवृक्षकां किञ्चिदिव परिश्रान्तां निकषोपावेश्य, समनन्तर-

दिनोपावर्तिनं तातस्यानुसंवत्सरिकश्राद्धविधिं कल्पविशेषेण स्वस्य च तातस्य च, यथानुरूपं निर्वर्तयितुमाहितचिन्तं मन्त्रयमाणं रामभद्रं, लब्धान्तरो विश्वसनीयं परिव्राजकलिङ्गमङ्गीकृत्यातिथिरिवाभ्यवर्तत ॥

पूजितश्च ताभ्यां निजान्वयश्रुतादिकं वर्णयन् प्रसङ्गेन श्राद्धकल्पेऽभिज्ञत्वमात्मन उपन्यास्थन् । तेन च सञ्जातकुतूहलो राघवः पर्यपृच्छन्—"भगवन्, निवपनक्रियाकाले केन पितॄंस्तर्पयामि । विशेषोऽभिधीयताम्" इति । स प्राह—"हिमवतस्सप्तमे शृङ्गे प्रत्यक्षस्थाणुशिरः-पतितगङ्गाम्बुपायिनो वैडूर्यश्यामपृष्ठाः पवनसमजवाः काञ्चनपार्श्वा नाम मृगाः प्रतिवसन्ति ।

यैस्तर्पितास्सुतफलं पितरो लभन्ते
हित्वा जरां खमुपयान्ति हि दीप्यमानाः ।
तुल्यं सुरैस्समुपयान्ति विमानवास-
मावर्तिभिश्च विषयैर्न बलाद्ध्रियन्ते ॥"

इति । तच्छ्रुत्वा "तर्हि तानद्याहरिष्यामि" इति कृतसंरम्भं राघवं पुनरुवाच कपटकर्मन्दी "अलमतिमनोरथेन । न ते मानुषैर्दृश्यन्त" इति । अथ सुधीरमुदाजहार रामभद्रः—"यदि हिमवान्सौवर्णान्मृगान्न मे दर्शयिष्यति बाणैः क्रौञ्चदारं तं विदारयिष्यामि" इति । तत्क्षण एव विद्युत्सम्पात इव लोचनहरो दूरादाविरभूत्काञ्चनपार्श्वो मृगः । "दिष्ट्या हिमवान्मयि परितुष्टः । अहो तातस्य भाग्यम्" इति मोदमानो रामस्तमुप-

च्छन्दयन्नर्घ्यमादायोपससर्प । मृगस्तु पूजामनवेक्ष्य पुरःपुरो धावन् राघवं सुदूरमाचकर्ष ॥

अथाक्षिगोचरमतिपतिते रामभद्रे, दशाननः स्वरूपं गृहीत्वा भयविह्वलाङ्गीं भर्तारमेव पुनःपुनराक्रोशन्तीं कुररीमिव वृषदंशकस्सीतां हठादाक्रम्य रथेऽवस्थाप्य खमुत्पतितः । तथा ह्रियमाणां जानकीं दृष्ट्वा निजसखस्य दशरथस्यानृण्यमिच्छन् जटायुर्नाम गृध्रराजः "मयि स्थिते क्यासि" इति तर्जयन्नभिपत्य पापाशयमेनं पक्षाभ्यां विक्षिपन्, तुण्डेन खण्डयन्, नखैश्च विदारयन्, सक्रोधं रुरोध । रावणस्तु रोषादुद्वृत्तनयनः प्रयुद्ध्यन्तं पतगेश्वरमसिना दक्षिणांसदेशे गाढं प्राहरत् । तेन निकृत्तावयवस्सद्यो गतायुरवनितलमाससाद जटायुः ॥

अत्रान्तरे एकप्लुत्यतिक्रान्तशरविषयं तमपूर्वहरिणं अनुद्रुत्य विफलश्रमस्सीतापतिस्साचिन्तायासं यावत्प्रतिनिववृते तावत्सीताशून्यमुटजमपश्यत् । अथ प्रत्यासन्नतापसमुखाद्यथावृत्तमधिगत्य, विदीर्यन्निव शोकेन बहु विलपन्, लक्ष्मणेन कथञ्चित्पर्यवस्थाप्यमानः काननभुवमनास्थया विचरन् वनौकसां धाम किष्किन्धामवाप । तत्र च निजाग्रजेन बलिना वालिना सदारापहारं निर्विषयीकृतो हनूमत्प्रभृतिभिः कतिपयैरेव स्निग्धैरुपास्यमानः सुग्रीवो नाम वानरमुख्यो महर्षिशापमहिम्ना वालिनो दुरासदं ऋश्यमूकपर्वतशृङ्गमवाप्तभङ्गः कृच्छ्रेण प्रतिवसति स्म । अथानयोस्तुल्यदुःखयोः परस्परोपकारकृतप्रतिज्ञयोस्सन्धिरघटिष्ट ॥

तदनु तदनुरोधेन तौ निरन्तरोपचीयमानस्निग्धभावौ अतुलभुजबलावलेपं हेममालिनं वालिनं निगृहीतुकामौ नियुद्धाय तमभिमुखीकर्तुं प्राक्रमेताम् । अथ सुग्रीवक्ष्वेलिताकर्णनप्रज्वलितमन्युश्शतमन्युसूनुरवधीरितताराप्रतिषेधवचनो गर्जन्नभिपत्य प्रक्रान्तविनयातिक्रममाक्रम्य विग्रहोद्धुरं सुग्रीवं मुष्टिनिर्घातनिष्पीडितमुद्ग्रीवितासुमकरोत् । ततस्सम्भ्रान्तेन हनुमता तामवस्थां प्रतिबोधितो रामभद्रस्तरुशाखाप्रच्छन्न एव वालिनं सप्तसालीविदारणदारुणमुखस्य शिलीमुखस्य शरव्यतामनैषीत् । स च तेन मर्मसु निहत्य सहसा निपातितः प्रस्रुतरुधिरप्रसेकपिच्छिले भूतले दुस्सहव्यथया कृतपरिसर्पणो धूळीधूसरिताङ्गः पतङ्ग इवासन्नास्तमयस्सीदन् मुमूर्षुरिपुवाचितनामानं राघवमाहवानभिमुखं भृशमकुत्सयत् । अस्थानोपक्रोशिनं तमुपगम्य रघुवीरः कृपाकुलमनास्समबोधयत् ॥

वागुराछन्नमाश्रित्य मृगाणामिष्यते वधः ।
वध्यत्वाच्च मृगत्वाच्च भवान् छन्नेन दण्डितः ॥

यवीयसो दाराभिमर्शनपातकी वध्य एव भवान्ननु । तेन हि युक्तदण्डानां योग्यमेव कृतमस्माभिः । मद्विहितेन च दण्डेन विगतपाप्मा त्वमनन्तान् लोकानवाप्स्यसि" इति ॥

अतःपरं निरुत्तरो वाली प्रबलानुशयतरळितान्तरङ्गं शोचन्तं सुग्रीवम् "ईदृशो लोकधर्मः" इति समाश्वास्य स्वतनयमङ्गदं तस्य हस्ते निक्षिप्य, "प्रतिगृह्यतामस्मत्कुलधनम्" इति स्ववक्ष-

स्संभुक्तां हेममालाञ्च तस्मै प्रतिपाद्य राघवं प्रसादयित्वा स्वर्गभागी बभूव । ततो यथाविधि तस्य हरिप्रवरस्यौर्ध्वदैहिकं निर्वर्तयित्वा रामलक्ष्मणौ सुग्रीवं किष्किन्धाराज्येऽभ्यषेचयताम् ॥

एवं निस्तीर्णस्वप्रतिज्ञाभरो निर्भरविरहोत्कण्ठाकुण्ठितानुभावो लक्ष्मणाग्रजस्सुग्रीवस्य कृतज्ञतावीरुधः फलदर्शनानुकूलं कालं प्रतीक्षमाणोऽवतस्थे । ततस्तेन वानराधिनाथेन सीताविचयनार्थं सर्वासु दिशासु प्रेषितेषु प्लवङ्गमपुङ्गवेषु, दक्षिणापथप्रवृत्तः कुमारोऽङ्गदो वेलातटमासाद्य सम्पातिमुखाल्लङ्कायां स्थापितां जानकीमवगत्य महाजवं वायुसूनुं हनूमन्तं प्रोत्साह्य रावणराजधानीं प्रविचेतुमुद्योजयामास । स च निरतिशयमहिमा रामकार्यगरिमाणमनुसन्धाय पाथसान्नाथमेकोत्पातेनातिलङ्घ्य लङ्कामवाप ॥

(३)

अथ निशाताहर्नाथमहसि निशामुखे, दशमुखमन्तरा प्रकुपितकृतान्तभ्रुकुटिभीमवीक्षणस्य प्रथमावतारमार्गादेशक इव, प्रत्यादेशभूतामलकायाः प्रधाननगरीं यातुधानानां, अलक्षितसञ्चारोचितं वपुषा तनूभवन् स हनूमानुल्लङ्घितप्राकारगोपुरः प्रविश्य नवरत्नखचितसुमेरुशृङ्गभङ्गीमनोहरासु प्रासादपरम्परासु

स्वेच्छया विचचार । अन्ततस्समधिगम्य सन्ततोल्लसितलक्ष्मी-प्रसादमेदुरं निशाचरेन्द्रप्रासादं, अन्विष्य च दिव्यभोगोचित-सामग्रीविशाला विभ्रमशाला: निरन्तरप्रत्युप्तरत्नावळीभासमानान् विमानान्, निद्रावशस्रस्तमुत्तानशयान्त:पुररमणीरमणीयतल्प-गर्भान् गर्भागारांश्च, कुत्रापि जनकराजनन्दिनीमप्रेक्षमाण: पव-माननन्दन:, "अहो व्यर्थो मे परिश्रम:" इति विषीदन् याव-दुन्नताग्रमेकं हर्म्यशृङ्गमारुह्य परित: पश्यति तावदविचितचरा-मदूरस्थां प्रमदवनराजिमलक्षयत् ॥

प्रविश्य च तां कल्पितक्रीडाशैलप्रेक्षणीयां, विचरदण्डज-वाचालितदीर्घिकाशीतलितां, परिपश्यन्, कस्यचित्पादपस्य मूल-माश्रित्य स्थितां ध्यानसंवीतहृदयां अनशनक्षामां कातर्यसंगूढस्तनो-दरीं एकवेणीधरां दुर्दिनान्तर्गतामिव चन्द्रलेखामारक्षकराक्षसी-गणपरिवृतां कामपि विरहव्यथामिव मूर्तिमतीं वरवर्णिनीमपश्यन् । "केयं भवेत्" इति क्षणं विचिकित्समानस्स उपासीदन्तं परि-जनकरावलम्बितदीपिकावळिद्योतितमार्गं निसर्गताम्रायताक्षं क्षण-दाचरचक्रवर्तिनमुद्वीक्ष्य कोटरान्तरितो भूत्वा वृत्तान्तजिज्ञासु-रवतस्थे ॥

तदानीमतिवेलसम्भूतमन्मथोन्मथितहृदय: पौलस्त्यस्तां मानवतीमुपसृत्य बहूनि प्रलोभनानि प्रस्तुवन्ननुकूलयितुं प्रायतत । शश्वन्निष्ठुरमधिक्षिप्य तृणवदवधीरितोऽपि तया, रामापवादगर्भितै-रात्मश्लाघोपन्यासकुत्सितैर्दु:श्रवैर्वचोभिस्तां स निर्लज्जो निरन्तरं

तुतोद। अथ च क्रुद्धा सा पतिदेवता "ननु देवि" इति सचापलमुपासीदन्तं निर्दहन्तीव दृष्टिपातेन तं पापात्मानं "शप्तोऽसि" इत्यवाभर्त्सयत्। अल्पैरप्येभिरक्षरैः प्रतिबद्धतेजा वज्राहत इव क्षुभ्यन् स रक्षःपतिस्सद्यो निवर्तयां बभूव॥

अथ निर्गते रावणे, निद्रामुद्रिताक्षीसु च राक्षसीषु. कोटरादवरुह्य विदितवेदितव्यो मारुतिस्सभक्त्युन्मेषं रघुवीरापदानानि गृणन् विनीतो देवीमुपससर्प। विविधशङ्कात्रिकल्पेन प्रथममजातप्रत्ययापि रामपत्नी सुश्लिष्टभाषिणि, सन्निधापिताभिज्ञानाङ्गुलीयके तस्मिन् विमृश्य विश्वासमुपागमत्। तन्मुखेन च वियोगविधुरं, सुग्रीवसाहाय्येन प्रतिपन्नसमरधुरं राघवधुरन्धरमवगत्य समाश्वसितमानसा तमाशीर्भिरभिनन्द्य, भर्त्रे प्राहितयथोचितसन्देशं विससर्ज॥

ततो हनूमान् निजागमनमन्तरेण रावणं विदितार्थं कर्तुमिच्छन् व्यञ्जयितुकामश्च हरिसेनावीरपराक्रमलवं भञ्जयांबभूव मन्दोदरीमानसोल्लासिनीमशोकवनिकाम्। तेन च मृणालवदुत्पाटितान् सालवृक्षान् मुष्टिना भग्नं दारुपर्वतकं पाणितलावमृदितानि लतागृहाणि नादमात्रेण विसंज्ञीकृतान् प्रमदवनपालकांश्च दृष्ट्वा भीताः किङ्करराक्षसा महाराजायापूर्वमिमं वृत्तान्तं निवेदयांचक्रुः। तच्छ्रुत्वा इदंप्रथमोपस्थितनिकारस्संमूर्च्छत्क्रोधविकारः पिशिताशनेन्द्रः स वानरग्रहणाय किङ्कराणां सहस्रमाज्ञापयामास। ते तु हनुमता वृक्षैरेव निहत्य व्यापाद्यन्त। अनन्तरागतान् पञ्च-

सेनापतीन् काञ्चनतोरणपरिघेण घातयित्वा मारुतिर्मुष्टिनिष्पेषणेन कुमारमक्षमप्यक्षिणोत् । ततः सक्रोधं निर्गतेनेन्द्रजिता सह चिरं प्रयुद्ध्य स व्यपनीतयुयुत्साकण्डूतिर्निशाचरेन्द्रदर्शन-कौतूहलेन प्रबलास्त्रवर्षिणस्तस्य स्वेच्छया वश्यतामयासीत् । नीतोऽभूच्च पाशैर्बद्धो राज्ञस्सन्निकर्षम् ॥

तत्र च, सुरदानवैर्मनसाप्यचिन्त्यामिमां लङ्कां मामप्यभि-भूय प्रविष्टः किल वानरः । "किमयं त्रैलोक्यविजयगर्वितेन कम्पितकैलासशैलेन दोर्मददुर्ललितेन मया अधिक्षिप्तस्य भगवतो नन्दिनः शापः कपिच्छद्मना मामिदानीमुपावृत्त" इति वितर्का-कुलहृदयं, मैथिलीप्रत्यर्पणमन्तरेण विच्छिन्नप्रार्थनोपक्रमेण विषण्णेन भ्रात्रा विभीषणेन अन्वासितं, राक्षसराजमुपगम्य हनूमान् दूत-समुदाचारमङ्गीकृत्य कुशलमन्वयुङ्क्त । तेन च सावज्ञं कस्त्वं शाखामृग इति पृष्टः पवनसूनुः सुधीरं स्वगोत्रोपन्यासपूर्वक-मात्मानं रामदूतं वर्णयन्, विभीषणानुज्ञातो रामशासनमित्थ-मुदैरयत् ॥

"व्रजशरणमुपैहि शङ्करं वा
प्रविश च दुर्गतमं रसातलं वा ।
शरवरपरिभिन्नसर्वगात्रं
यमसदनं प्रति यापयाम्यहं त्वाम् ॥" इति ।

तच्छ्रुत्वा सगर्वोपहासं प्रस्तुतनिजवीर्यापदानवर्णनं दशकण्ठं, साव-हित्थमित्थमप्राक्षीन्मारुतिः, "एवंविधेन भवता किमर्थं तस्य

प्रच्छन्नं दारापहरणं कृतम् । इति । तमनुमोदमानो राक्षसो-ऽप्यराक्षससत्वो विभीषणो निरूपयामास ॥—

अपास्य मायया रामं त्वया राक्षसपुङ्गव ।
भिक्षुवेषं समास्थाय छलेनापहृता हि सा ॥ ९ ॥

इति । सद्यः क्रोधसंरक्तनयनं दृष्ट्वा तु भ्रातरं सानुनयमित्थं स पुनराचचक्षे ॥—

"प्रसीद राजन् वचनं हितं मे
प्रदीयतां राघवधर्मपत्नी ।
इदं कुलं राक्षसपुङ्गवेन
त्वया हि नेच्छामि विपद्यमानम्" ॥ १० ॥ इति ।

अथ तदानीमप्यनुक्तग्राहिणं, स्ववीर्यावलेपमूर्च्छितं, "कथं लम्बसटस्सिंहो मृगेण विनिपात्यते ।" इति कृतमुधाविकत्थनं प्रक्षीणपुण्यं रक्षःपतिं नामग्रहणेन निर्मर्यादं बहु विनिनिन्द हनूमान् । येन प्रदीप्तक्रोधेन, "लाङ्गूलमादीप्य विसृज्यतामयं दूताधम" इति किङ्करानुशासता तेन, "यदि तेऽस्ति धनुः-श्लाघा दीयतां मे रणो महान्" इति राघवाय प्राहितसन्देशस्सनिरस्यत ॥

अनन्तरं भ्रातुरपरिहार्यया विप्रतिपत्त्याऽतिमात्रं निर्विण्णो विभीषणः पुनस्तमुद्बोधयामास—"राजन्नाप्तवचः किन्न शृणोषि । सीतापहरणे न केवलमधर्मः, दुस्तरो बलवद्विग्रहश्चोपनिपातितः ।

हन्त सर्वथा रक्षःकुलस्य विनाशोऽभ्यागत इति मन्ये" इति। किन्तु हितमनाद्रितया विपद्यमानभाग्येन दशग्रीवेण, क्रोधोद्वृत्तारुणविंशतिनयनमुद्वीक्ष्य, "शत्रुपक्षमाश्रितो निर्भयं मामभिभाषमाणो राक्षसाधमोऽयं सद्यो निर्वास्यताम्" इति धिक्कृतस्स धर्मात्मा "एवं प्रशासितोऽहमनपराद्धः स्वयमेव प्रयामि" इत्युक्त्वा रामपादमूलमाशिश्रयिषुः निर्जगाम ॥

उत्पत्य च गगनमार्गेण वाराशिमुल्लङ्घ्य प्रत्यागतहनूमदावेदितवृत्तान्तमावेलातटमागत्य पुरतो दुश्शकप्रसरत्वात् तत्रैवावस्थापितस्कन्धावारं वानरानीकपारावारमुपासदत्। राक्षसत्वादाशङ्कनीयशत्रुभावं तमापतन्तमुद्वीक्ष्य तन्निग्रहार्थं कृतसम्भ्रमेषु वानरवीरेषु, विभीषणस्सञ्जातप्रत्यभिज्ञं हनूमन्तमुपसृत्य, "मदागमनं देवाय निवेदय" इति प्रार्थयामास। स च हृष्टो राघवं व्यजिज्ञपत्—

"राजंस्त्वत्कारणादेव भ्रात्रा निर्विषयीकृतः।
विभीषणोऽयं धर्मात्मा शरणार्थमुपागतः" ॥ इति।

संश्रितवत्सलो दाशरथिर्लक्ष्मणेन तमानाय्य प्रतिनन्द्य च, "अद्य प्रभृति मद्वचनाल्लङ्केश्वरो भव" इत्यनुजग्राह ॥

दिष्ट्या विभीषणागमनेन कार्यसिद्धिमाशंसमानो रघुपतिस्तं, सागरतरणे कमुपायं पश्यसीत्यपृच्छत्। तेन च, "यदि मार्गं न ददाति समुद्रो दिव्यमस्त्रं तावद्विस्रष्टुमर्हति देव" इति

विज्ञापिते रामे तदनुतिष्ठति, जलमध्यात्सरभसं वरुणः स्वयमुदतिष्ठत् । तत्प्रसादेन क्षणाद्गाधभाजं सलिलनिधिं ससैनिकमुत्तीर्य रघुवीरो लङ्कासीम्नि सुवेलकटके कटकं स्थापयामास ॥

अथ क्रमान्निवेश्यमानासु सेनासु तत्तद्वृन्दपरिग्रहेषु परीक्ष्यमाणेषु, पुस्तकप्रामाण्यात्कुतश्चिदप्यविज्ञायमानौ द्वौ वनौकसौ गृहीतौ । विभीषणो निपुणं निरीक्ष्य, "राक्षसेशमन्त्रिणौ शुकसारणावेतौ रन्ध्रान्वेषिणौ" इति तयोर्याथार्थ्यं विभावयामास । तौ च दयानिधी रामः पौलस्त्याय, "रणातिथिस्त्वां द्रष्टुमहमागत" इति ग्राहितसन्देशौ विमोचयामास ॥

अथ प्रावर्तत पुङ्खानुपुङ्खप्रहितनिरन्तरशरवर्षसंपादितोद्गाढदुर्दिनोदयानामाशराणां, निजभुजोत्पाटितानेकानोकहनिवहशैलशृङ्गोत्करमात्रप्रहरणानाञ्च वानरानीकानां निरवकाशीकृतगगनाभोगस्तुमुलस्संपरायः । तत्र चोत्पुच्छकर्णवानरप्रवरगृहीतकण्ठनिष्पेषणोद्गलितनयनविकृतमुखरक्षोगणाकीर्णः, क्रुद्धनक्तञ्चरकरपरिभ्रमितकृपाणिकाशतसम्पातप्रविदीर्णोद्भटवानरभटः, प्रवहदसृक्पूरवाह्यमानविपन्नहरिरक्षःकुणपराशिबीभत्सः, पश्यतामनिमिषमनिमिषतां प्रतिभयंतामवहत्समराजिरः । तदानीमनपेक्षितबन्दीग्रहसाहसमप्सरोगणस्वयंवरणोत्सवसंपादकं वीरस्वर्गमापुरसङ्ख्यास्सङ्ख्ये नैर्ऋतवीराः ॥

अथ विपद्यमानाभ्युदये राक्षसकुले, समरचकितासु पराङ्मुखतया पलायमानासु पृतनासु, निहतेषु प्रहस्तनिकुम्भकुम्भकर्ण-

प्रमुखेषु मुख्यपुरुषेषु, व्यपयान्त्याश्च स्वस्मात् आवैश्रवणनिरासात् स्वायत्तीकृतायां विजयश्रियां, परित्रातव्यभूतनिजात्मापि सचिववचांस्यनपेक्ष्य दुर्व्यवस्थितनियतिपारतन्त्र्येण मुह्यन्, वीरमानी दशवदनो, मदनावेशदाहपरिध्वस्तमतिस्सीतामृगतृष्णिकामेव भूयोऽन्वधावत् । मिथ्या तां मोहयिष्यन्स दुरात्मा, रामलक्ष्मणयोश्शिरःप्रतिकृती आनाय्य, "अयि मुग्धे, अद्यापि किमनुबध्नासि, गतायुषि तापसहतके तस्मिन् भावम् । पश्येमे कुमारेणेन्द्रजिता हतयोस्तयोर्मानुषपोतयोश्शिरसी" इति दर्शयन् दयितागमनवृत्तान्तश्रवणदरोच्छ्वसितं तस्याः पतिव्रताया मानसं निर्दयं निर्ममन्थ ॥

अत्रान्तरे रामेण निहतमिन्द्रजितमख्यात् संभ्रान्तः कोऽपि किङ्करः । तदाकर्णनव्यलीकपरिभूतो लङ्केश्वरस्तथा विव्यथे, यथा स स्वपरिजनानामप्यनुकम्पनीयो बभूव । विललाप च सन्तापविह्वलः—"किमिदानीमनर्थहेतुभूतया सीतया, त्रैलोक्यविजयेऽपि विफलया चपलया श्रिया च । किं भोः कृतान्तहतक! सुतप्रणाशपरिदीने मयि अद्यापि कातरोऽसि । हा धिक्!

इदानीमपि निस्स्नेहो वत्सेनेन्द्रजिता विना ।
कष्टं कठोरहृदयो जीवत्येष दशाननः ॥ १२ ॥ इति ।

विलपंश्च मूर्च्छितः पपात भूपृष्ठे ॥

तदनु निजाभियुयुक्षुं रोषेणाभिपतन्तं राघवं किङ्करमुखाच्छ्रुत्वा स प्रज्वलितक्रोधो मूर्तिमानिव वीरो रसः, "क्कासि

कासि" इति समुद्यतासिस्सहसोदतिष्ठत् । उत्थाय च, "रे रे क्षुद्रतापस, पश्यन्तु त्वामद्य निराशा गीर्वाणाः, वज्रीभकुम्भतटपाटनकठोरधारस्यास्य कृपाणस्य क्रोधोपहारतां नीतम्" इति जगर्ज । पुनस्सीतां निरूप्य, साक्रोशावेगं, "अस्याः कारणेन किलैतावाननर्थः" इति तां हन्तुकामः परिपतन्नासन्नपरिजनेनानिवार्येत । ततस्स पापात्मा सूतोपनीतं स्यन्दनमास्थाय सङ्ग्रामावतरणत्वरया निर्ययौ ॥

ततस्त्रिलोकी-जेगीयमानपरस्परवीरापदाननिकषायिते तस्मिन्महति युद्धे, सरोषौत्सुक्यं निभृतं निरीक्षमाणेषूभयपक्षीयेषु लीलयैव द्वेधाकृत्य प्रतिपक्षप्रहितां कालान्तकोपमां शक्तिं, तत्क्षणमिन्द्रेणोपप्रेषितं रथमारूढेन, निरन्तरबाणवर्षावरुग्णारातिस्यन्दनहयध्वजादिना प्रळयसूर्यदुर्निरीक्ष्येण, अमोघवेधं वेधसो दिव्यमस्त्रं प्रयुञ्जानेन, जिताशेषरथिना दाशरथिना निकृत्तदशशिरःपतनसमकालाभिवृष्टसुमनस्सुमनोवृष्टिमेदुरमुत्सादितो रावणः । सद्यस्तद्वचनाद्विभीषणश्च लङ्कापतिर्बभूव ॥

एवं स्ववीर्यमहिम्ना निहत्य युधि त्रैलोक्यविद्रावणं रावणं, तदभिनिवेशिनश्च भीमकर्मणो रक्षोगणान्, अराक्षसवृत्तेर्विभीषणस्याभिषेकेण कृतकृत्यो राघवश्शत्रुकुलनिवासादनुभूतानल्पदुःखां सीतामाश्वासयितुकामस्तद्दर्शनमनुचिन्तयामास ॥

तदा विभीषणः प्रविश्य स्वयमेव कृतोपसर्पणां देवीं राघवाय न्यवेदयत् । रामस्तु जनापवादपरिजिहीर्षया प्रकटमित्थ-

माज्ञापयामास । "विभीषण, न मां द्रष्टुमर्हति रजनिचरावमर्शजातकलङ्का, इक्ष्वाकुकुलकीर्तेः कालुष्यहेतुभूता जानकी । तत्रैव तावत्तिष्ठतु" इति । सीतापक्षपातेन प्रसादार्थीनि तन्निर्बन्धवचनानि च निर्दयमवधीरयामास ॥

एवं धिक्कृतमात्मानं विज्ञाय मानवती जनकयजनसंभवा, विमुक्तजीवितप्रत्याशा, अग्निप्रवेशकृतनिश्चया भर्तुरनुज्ञां प्रतिपालयामास । अनुज्ञाता च तेन विकसितमुखी हंसीव पद्मवनमनिर्विण्णा विभावसुमविक्षन् । तदानीमाश्चर्यमाश्चर्यमिति चित्रीयमाणे द्रष्टृलोके रामस्सद्योजातानुशयो लक्ष्मणं सहसा तां साहसान्निवारयितुमादिदेश । किन्त्वेतावतैव सा पतिदेवता, ज्वलनं प्रविष्टा शीतसुखस्पर्शमादधतस्तस्मात् कनकमालेव वर्धितप्रभा निर्विकारं निरमज्जत् । तां च स्वयमेव भगवान् हव्यवाहनस्समादाय रावणान्तकमभिवर्तमानो व्यजिज्ञपत्—

"इमां गृह्णीष्व राजेन्द्र सर्वलोकनमस्कृताम् ।
अपापामक्षतां शुद्धां जानकीं पुरुषोत्तम ॥ १३ ॥

इमां भगवतीं लक्ष्मीं जानीहि जनकात्मजाम् ।
सा भवन्तमनुप्राप्ता मानुषीं तनुमास्थिता" ॥ १४ ॥

इति । राघवस्सप्रमोदं मैथिलीमङ्गीकृत्य, "अस्याश्शुद्धिं जानतापि मया लोकप्रत्ययार्थमेव नैष्ठुर्यमित्थमाविष्कृतम्" इति वैश्वानरमाश्वासयामास ॥

तदनु समग्रैस्सिद्धविद्याधरगन्धर्वाप्सरःप्रभृतिभिः देवैः विजयवाग्भिः गीतनृत्तादिभिः पुष्पवृष्ट्या चाभिनन्दितमङ्गलो, दशरथानुमत्या च तैरेवाभिषिक्तः पृथिवीराज्ये, सीतया सह पुष्पकमारुह्य सबन्धुमित्रो रघुपुङ्गवस्साकेताभिमुखं प्रतस्थे । मध्येमार्गमवतीर्य जनस्थाने कुलपतिसपर्याकल्पितविश्रमो विचरित-चरमाश्रमपदं सीतया सह सस्नेहानुस्मरणमनुभवन् स निर्वृतो यावत्तिष्ठति, तावत् आसीताहरणोदन्तश्रवणात् अग्रजसाह्यार्थं समाहृतप्रभूतसेनासमुदयानुकर्षमन्थरं प्रसरन्नुररीकृतलङ्काभियानो भरतस्तं देशमनुप्राप्तो भ्रात्रा समगच्छत ॥

तत्र च बन्धुजनाभिनन्दितस्सीतापतिः कैकेयीवचनात् भरतप्रत्यर्पितां राज्यधुरमङ्गीकृत्य वसिष्ठवामदेवादिभिर्महर्षिभिः प्रकृतीः पुरस्कृत्य यथाविधि निर्वर्तिताभिषेकमङ्गळः पुष्पकेणैव सर्वैस्समुपेतस्साकेतमवाप । अथाधिवसन्निक्ष्वाकुराजधानीमप्रति-हतशासनः पावनापदानस्स नक्तञ्चराभ्युदयधूमकेतुरापादित-त्रिलोकीभद्रो रामभद्रस्सुचिरं व्यलासीत् ॥

इति श्रीरामचरितम् ।

इति श्रीमन्महालिङ्गकविकृतिषु भासकथासारे

द्वितीयो भागस्सम्पूर्णः ।

॥ समासश्चायं पूर्वार्धः ॥

भासीयश्लोकानुक्रमणिका ॥

Index of Verses quoted from the Originals

(for Parts I & II)

THE BHASAKATHASARA.

GLOSSARY.

PART I.

॥ बालचरितम् ॥

Page.	Line.	Word.	Meaning.
1	3	उद्दार	= beautiful.
,,	11	संपत्तिः	= prosperity.
2	11	देवरूपिणि	= with celestial appearance; or who was a divine incarnation.
,,	12	विडम्बना	= disguise.
,,	15	उद्दाम	= furious; dreadful.
,,	17	आनकदुन्दुभिः	= Vasudeva.
3	19	प्रतिरूपकः	= corresponding; a substitute.
4	10	मोचयति	= loosens; flings away; dismisses.
,,	10	आघट्टयति	= shakes (here, draws up).
,,	15	अनु चरितुं	= to follow suit.
5	10	भर्त्सनं	= reproach or threat.
,,	11	समाधातुं	= to make steady; to get composure.

Page.	Line.	Word.		Meaning.
5	14	प्रतिभास		appearance ; illusion.
6	14	आबभार	=	possessed fully ; bore up.
,,	16	कुलं	=	family ; house or abode of family.
,,	17	विभूति	=	magnificence.
7	8	केलिसब्रह्मचारिन्	=	associates in (his) pranks or wanton jokes.
,,	9	दुर्नय	=	misconduct.
,,	10	निरूपित	=	investigated ; ascertained or proved.
,,	11	अभिद्रोग्धुं	=	seeking to assail or do injury.
,,	18	यूथ्यः	=	belonging to a group or troop.
8	11	पल्लवमात्रेण	=	just as long as a twig or a blade of grass.
,,	16	दुष्प्रसह	=	irresistible ; terrible.
,,	20	समर्थ्य	=	having deliberated ; reconciling within himself.
9	9	मन्थर	=	inactive ; stupid.
,,	12	अभिमर्श	=	assault ; outraging.
,,	17	क्षमापयितुं	=	to beg pardon or forgiveness.
,,	,,	व्यादिशन्	=	pointing out as a plea : putting forward as an excuse.
11	10	मण्डलानि	=	the multitudes or the troops collecting around.
,,	12	अभिनन्दनं	=	congratulating ; praising.

|| मध्यमव्यायोगः ||

Page.	Line.	Word.	Meaning.
12	9	निसर्गः	= giving up; abandoning.
,,	10	अभिसन्धिः	= object; aim; intention.
13	5	समयः	= a stipulation or a compact.
,,	16	मध्यमः	= It is well-known that पाण्डव-मध्यम denotes Arjuna and cannot be applied to Bhima. But here it should be noted that an important dramatic purpose is served by this deviation from authority.

The word मध्यम is repeated by Bhima for the sake of emphatic demonstration eight times, and is intended, I think to denote variously, "one of those"; "among": "the middle-born"; "the intervener"; "an impartial person"; "the central gem, etc."

In the sense of "an impartial person" I venture to think the word suggests यम the destroyer who is called समवर्तिन् ।

Page.	Line.	Word.	Meaning.
15	4	प्रतिपद्य	= having assented to or complied with.
,,	8	नियुद्धं	= close personal combat.
,,	18	मुखरागः	= the complexion of the face.
,,	19	चापलं	= rash conduct; inconsiderate act.
,,	22	सुपर्यवसन्नः	= terminated happily; ended well.

॥ पाञ्चरात्रम् ॥

Page.	Line.	Word.	Meaning.
16	4	आमोदितुं	= to rejoice.
,,	4	अन्तरेण	= except.
,,	6	सभाजित	= paid respects to; congratulated.
,,	9	अवलेपपारुष्य	= haughty cruelty, i.e., cruelty due to his pride.
17	1	वाह्यः	= should be taken along or brought round.
19	2	अवष्टम्भ	= haughtiness.

॥ दूतवाक्यम् ॥

Page.	Line.	Word.	Meaning.
21	2	धर्म्यं दायाद्यं	= lawful or legitimate inheritance.
,,	4	विप्रकृत	= offended or insulted.
,,	4	हठः	= violence or force.
,,	10	काञ्चुकीयः	= a door-keeper; or probably, one of the chamberlain family. (The name is taken from the text of Bhasa.)
22	14	संक्षोभयिष्यन्	= with a view to provoking or irritating him.
,,	18	प्रतिजानन्	= asserting.
23	7	कुहकः	= a cheat; rogue or a juggler.

॥ दूतघटोत्कचम् ॥

Page.	Line.	Word.	Meaning.
24	10	अकुत्सयत्	= condemned or censured.
,,	13	प्र तुन्नः	= repeatedly urged or to do a thing; pressed forward.

Page.	Line.	Word.	Meaning.
25	4	महतीं सम्भावनामवधीरयन्	repulsing his high esteem or supposition.
,,	7	अमर्षित	= unforgiving; indignant.
,,	11	अवभर्त्सित	= derided; scoffed at. अव indicates depreciation.
,,	14	व्यवसाय	= resolve.
,,	17	पर्यवस्थापयन्	= consoling him.
,,	18	व्यूह	= a military array.
,,	18	संयोजयित्वा	= having brought together; prepared or arranged.

॥ कर्णभारः ॥

Page.	Line.	Word.	Meaning.
27	5	कर्णभारः	= Karna's toil, burden or responsibility.
,,	6	तुमुलीभूते	= when it was raging fiercely.
28	8	अश्वीयं	= a number of horses or cavalry
,,	11	अपर्याप्तः	= unlimited.
,,	21	दानशौण्डीरः	= one who takes high pride in giving whatever is asked for.
29	1	विपर्यस्यति	= undergoes change.
,,	3	निकृत्य	= having torn off or cut asunder.
,,	7	किरीटिमान्	= one who has Arjuna on his side (as his son).
,,	12	प्रदिष्टा	= granted, conferred upon; despatched.

॥ ऊरुभङ्गः ॥

Page.	Line.	Word.	Meaning.
30	2	उड्डामर	= terrific.
,,	6	समन्तपञ्चक	= a sacred place in or near Kurukshetra.

Page.	Line.	Word.	Meaning.
31	3	दुर्योधनापेक्षया	= out of regard for, or for the sake of, Duryodhana.
,,	7	रणाभिसन्धिः	= terms properly to be observed in warfare.
,,	12	तपस्विन्	= helpless, pitiable.
,,	15	प्रतिज्ञावसिते	= means अवसितप्रतिज्ञे* ।

* It has not been deemed necessary to correct to grammatical precision the lapses occurring in the verses quoted from the text of Bhasa.

,,	17	आत्मनिर्वाहिन्	= who saved himself .
32	5	अन्वास्ते स्म	= did attend ; followed closely.

PART II.

॥ श्रीरामचरितम् ॥

(१)

36	2	वयःस्थ	= youthful, grown up.
,,	9	नान्दिपटहः	= a kettle drum sounded on occasions of joy.
,,	9	भद्रासनं	= a throne or a splendid chair of State.
,,	10	पुष्परथः	= a carriage for travelling for pleasure (but not for war).
37	12	नेपथ्य	= dress ; apparel, particularly of actors.
,,	12	अवदातिका	= Sita's maid.
38	6	शुल्के विपणितं	= transacted in the marriage settlement.
,,	11	मूर्च्छित	= violent or filled with ; insensible.

Page.	Line.	Word.	Meaning.
38	16	अनुस्यूत	= strung along with or linked to closely.
,,	17	प्रसाधित	= dressed ; decorated.
,,	18	अवनोचित	= fit to protect a kingdom or not one who could properly or rightly be sent to the forest ; or again, unaccustomed to forest-life.
39	8	सीता कौतुकवर्धन-श्रद्धया	= with an intimate desire to animate or rear the mirthful or sportive eagerness of Sita.
40	1	कार्पण्यमुद्वहन्	= suffering or experiencing wretchedness.
,,	1	अवस्कन्दिन्	= attacking, assailing.
,,	11	सङ्गर	= promise ; undertaking.
41	8	दुराग्रह	= foolish obstinacy, pertinacity
,,	11	सावेगाक्रोशं	= crying out or reviling in excitement.
,,	19	दृढमकल्यः	= seriously ill.
42	7	दिलीप etc.	= The order of Dilipa, Raghu, and Aja, is not warranted by the puranas nor by the Ramayana ; but is given by Kalidasa and Bhasa alone in literature.
44	7	निजाग्रजं	= Bharata is assumed to be the younger brother of Lakshmana, probably because he was the son of the youngest of the queens ;

Page.	Line.	Word.		Meaning.
				but there is no warrant for this in the Ramayana.
44	14	इक्ष्वाकुः	=	a descendant of Ikshwaku.
				(२)
45	12	उद्घात	=	jolting ; (figuratively) hardships and obstructions ; non-smooth career in the forests.
,,	13	परीताप	=	agony ; anguish ; grief.
,,	13	साक्रोशनैष्ठुर्यं	=	with harsh or smart blaming or with abusive heartlessness.
,,	16	प्रत्याययन्ती	=	convincing (him); leading him to the conviction.
,,	16	अनूदित	=	seconded or supported by.
46	11	दैवतन्त्रकं	=	due to subservience to destiny.
,,	15	वात्सल्य	=	fond affection or partiality for.
,,	21	हेवाकि	=	ardently desirous of ; eager for.
47	2	नान्दीमुखोपहार	=	a sacrifice offered (to certain manes called Nandimukhas) preliminary to any observance ; (here figuratively.)
,,	5	निर्हरणं	=	rooting up ; extirpation.
,,	6	अन्तरा सीमन्तित	=	marked or divided here and there on the way.
,,	12	प्रधर्षणं	=	outrage, ill-treatment, insult.

Page.	Line.	Word.	Meaning.
47	15	प्रमाथ	= slaughter, destruction.
,,	17	अभिनिवेशिन्	= adhering or clinging to; fixing on; becoming intent [upon.
,,	17	तर्ष:	= thirst.
,,	18	औपयिकं	= a means; an expedient; a remedy.
,,	21	निकषा	= closely; near.
48	1	कल्प	= a prescribed alternative; optional rule or sacred precept.
,,	1	विशेष	= superior; choice.
,,	3	विश्वसनीय	= capable of inspiring confidence.
	5	श्रुतं	= Holy learning or learning in general.
	9	श्याम	= dark blue.
,,	16	कपटकर्मन्दिन्	= pseudo-ascetic.
49	4	विह्वल	= agitated; perturbed.
,,	4	वृषदंशक:	= a cat.
,,	8	विक्षिपन्	= throwing about; shaking to and fro.
,,	16	अनास्थया	= indifferently.
,,	18	निर्विषयीकृत:	= deprived of territory or realm.
50	5	विग्रहोद्धुर	= intrepid or firm in fight or battle.

(३)

Page.	Line.	Word.	Meaning.
51	13	अन्तरेण	= with regard to.
,,	15	प्रत्यादेश	= that which eclipses.

Page.	Line.	Word.	Meaning.
52	2	मेदुर	= full of.
,,	3	विभार	= rich ; abounding in.
,,	4	विमान:	= a palace with seven stories or a splendid hall.
,,	5	गर्भागार	= female apartment.
,,	11	संवीत	= overwhelmed ; shut in.
53	10	वियोग विधुर	= miserable or distressed through separation.
,,	10	धूः	= task or responsibility.
54	21	सावहित्थं	= with a concealed feeling or dissimulation.
56	5	प्रशासित	= punished.
57	4	तृत्तद्वुन्द etc.	= when the constituents or recruits of the various divisions under the command of the respective captains were being checked.
,,	5	पुस्तकप्रामाण्यात्	= from the authority of the register of names.
,,	11	दुर्दिनोदय	= appearance of a cloudy day ; or rise of a thick darkness.
58	11	व्यलीकं	= pain, sorrow ; grief.
59	8	निकष:	= a touchstone ; test.
,,	9	निभृतं	= motionlessly ; silently.
,,	11	अवरुग्ण	= broken to pieces.
60	8	अनिर्विण्णा	= not being overcome with grief.

ERRATA for Vol. I.

पूर्वार्धस्य शुद्धाशुद्धपत्रिका ॥

Page.	Line.	For.	Read.
4	16-17	आयुधस्सुद	आयुधं सु-
5	19	प्रबुध्यन्	प्रबुद्धः
6	20	उल्लास	उल्ललास
10	3	तत्क्षणादागतेन	तत्क्षणागतेन
12	6	लब्ध	लब्धः
14	5	निभल्य	निभाल्य
15	17	भृष्ट	भ्रष्ट
23	15	वरायुधान्	वरायुधानि
30	2	प्रस	प्रास
37	2	क्विमपि	किमपि
43	5	कोसल्या	कौसल्या
53	4	निवर्तयां	निवृत्तो
,,	5	क्षीसु	क्षीषु
56	3	आद्रितया	आद्रियता
57	2	गाधभाजं	गाधताभाजं
59	6	अनिवार्यत	न्यवार्यत
61	8	कर्षम	कर्षणम

BHASA KATHA SARA

VOL. II.—PART III.

भासकथासारः

उत्तरार्धः

(तृतीयो भागः ।)

BY

Y. MAHALINGA SASTRI, B.A., B.L.,

KUMBAKONAM

Price 8 Annas.

BHASA KATHA SARA

Vol. II—Part III

BEING A PROSE ABRIDGEMENT OF THE TRIVANDRUM PLAYS ATTRIBUTED TO

BHASA

BY

Y. MAHALINGA SASTRI, B.A., B.L.

Son of Mahopadesaka, Sastra Ratnakara,

YAGNASWAMI SASTRI AVL.,

Advaita Sabha Pandit, Kumbhakonam

PUBLISHED FOR THE AUTHOR

BY

R. SUBRAHMANYA VADHYAR,

Bookseller & Publisher.

KALPATHI—PALGHAT.

1928.

PRINTERS:
St. Joseph's Industrial School Press.
TRICHINOPOLY.

॥ श्रीरस्तु ॥

॥ भासकथासारः ॥

भागत्रयात्मके तृतीयो भागः ।

महाकवि श्रीभासप्रणीतनाटकानां कथासङ्ग्रहः ।

श्रीमद्भरद्वाजकुलतिलकश्रीमदप्पय्यदीक्षितवंशमुक्ताफलानां
महामहोपाध्याय राजुशास्त्र्याख्या विख्यातश्रीत्यागराज-
मखिराजानां प्रपौत्रेण महोपदेशक-शास्त्ररत्नाकरादि-
बिरुदाञ्चितपण्डितवरश्रीयज्ञेश्वरशर्मणामात्मजेन

श्रीमहालिङ्गकविना

विरचितः ।

पालक्काट्—कल्पात्ति
श्री गीर्वाणवाणीपुस्तकशालाधिपतिना

आर्. सुब्रह्मण्योपाध्यायेन

ग्रन्थकर्तुः कृते प्रकाशितः ।

१९२८.

CONTENTS for Vol. II.

उत्तरार्धे कथानुक्रमः ॥

तृतीयो भागः ।

॥ श्रीरस्तु ॥

भासकथासारः ॥

तृतीयो भागः ।

॥ वत्सराजचरितम् ॥

(१)

कुलं वा शीलं वा विभवमथवा मानविशयं
जनस्य स्निग्धस्याप्यनुमतमनादृत्य सहसा ।
यदाज्ञां बाला अप्यनुविदधते निश्चितधियो
नमस्तस्मै सद्यः प्रभवदुपदेशाय गुरवे ॥

पुरा किल प्रकाशराजर्षिनामधेये भारते वंशे जातो निखिललोकोपगीतकीर्तिर्मूर्तिमानिव जनसमुदयाभ्युदय उदयनो नाम शतानीकपुत्रः प्रजावत्सलो वत्सराजः पृथिवीमशिषत् । तस्य च कौशाम्बी नाम प्रधाननगरी ॥

स बाल्य एव प्रतापवत्तया शमितारातिदुरितो निराबाधां श्रियमनुभवन् शनैर्यौगन्धरायणाद्येषु मन्त्रिमुख्येषु राज्यरक्षाधुरं विन्यस्य सुखेष्वेकान्ततत्परो बभूव । अनारतं स मृगयाव्यसनेन नागवनानि बभ्राम । तस्य च गान्धर्वपारदृश्वनः कुलोपलालितां घोषवतीं नाम कलनिर्ह्रादिनीं वीणां वादयतो दन्तिनस्सुखेन वशमाययुः ॥

एवं क्रीडतस्तस्य प्रत्यन्तवर्ती प्रद्योतो नामोज्जयिनीभर्ता साम्मुख्येन समराक्षमामक्षौहिणीमाकलय्य छलेन ग्रहणमनुचिन्तयामास । इयेष चाभिलषणीयवरगुणाय दर्पादनाकाङ्क्षितसम्बन्धायाप्यस्मै प्रदातुं निरतिशयलावण्यशालिनीमात्मनो दुहितरं वासवदत्ताम् । तेन हि, युक्त्या स कुवलयश्यामलं महान्तं यन्त्रहस्तिनं निर्माय, अमात्यशालङ्कायननेतृकं वीरपुरुषाधिष्ठितं तं मृगयालोलुपस्य वत्सराजस्य विहारोचिते विषयान्तगहने स्थापयामास ॥

अथ कदाचिदुदयनो नर्मदां तीर्त्वा वेणुवने परिच्छदमावास्य, गजयूथविमर्दयोग्येन बलेन नागवनं प्राप्तो, मदयन्तीपर्वतमनासाद्यैव तटाकोत्थितं नागयूथं निध्यायन्, केनाप्युपस्थितेन पदातिना विज्ञापितोऽभूत्—"भर्तः! इतः क्रोशमात्रे मल्लिकासालप्रच्छादितशरीरो नखदन्तवर्जमेकनीलो हस्ती मया दृश्यत" इति । ततस्तं सुवर्णशतप्रदानेन परिपूज्योदयनः स्वानुचरान् प्रत्यभाषत—"अस्त्येष चक्रवर्ती हस्ती नीलकुवलयतनुर्नाम हस्ति-

शिक्षायां पठितः । तदप्रमत्ता भवत यूयमस्मिन्यूथे । गजं तमहं वीणाद्वितीय आनयामि" इति ॥

तदा तमुपरुध्य रुमण्वान्नाम मन्त्री विज्ञापयामास—"स्वामिन्न खलु ते ऐरावणादीनामपि दिशागजानां ग्रहणं न सम्भावनीयम् । किन्त्वासन्नदोषाणि विषयान्तराणि : यत्र रन्ध्रान्वेषी प्रत्यन्तनिवासी जनः । तन्नैकाकिना स्वामिना गन्तव्यम् । अहमप्यनुवर्ते" इति । उदयनस्त्वमात्यमात्मजीवितनिर्दिष्टेन शपथेन निवार्य, सुन्दरपाटलं नामाश्वमारुह्य, अनर्घोद्गते सूर्ये विंशतिमात्रैः पदातिभिस्सह प्रतस्थे ॥

गतस्य च तस्य कश्चिदध्वानं सालवृक्षच्छायायां सावर्ण्यनष्टनीलतया प्रोद्भासमानाभ्यामशरीरविनिक्षिप्ताभ्यामिव दन्तयुगलाभ्यां सूचितो धनुश्शतमात्रेणेव दृष्टिगोचरोऽभूत्स दिव्यवारणप्रतिच्छन्दः । ततस्तेनाश्वादवतीर्य देवतानां प्रणामं कृत्वा गृहीता वीणा । तदानीमतर्कितोत्पातं समुत्पत्य तस्मात्कृतकहस्तिनः प्रद्योतभटास्तमभिदुद्रुवुः । तत्कूटं प्रद्योतप्रयोगमवगत्य शूरोऽभिमान्युदयनस्सुन्दरपाटलमारुह्य, महता रोषेणाविष्टः खड्गमात्रसहायः प्रविवेश तत्परबलम् ॥

ततः परिक्रीडन्निवैकाकी बहुषु प्रहरन्ननुबद्धदिवसयुद्धपरिश्रान्तो गाढप्रहारजर्जरिताङ्गस्स प्रतपत्सूर्यदारुणायां वेलायां मोहं गतः । नियन्त्रितोऽभूच्च शत्रुभिः प्राकृत इव सन्निहितगहनोत्पाटिताभिः कर्कशाभिर्वनलताभिः ॥

अथ चिरात्प्रत्यागतप्राणमेनं पूर्वं वैरमनुस्मृत्य पापनिश्चया-नभिद्रवतः कांश्चिन्नृशंसान् सहसोपस्थितः प्रद्योतामात्यश्शालङ्का-यनो निवारयामास । ततश्शरीरयन्त्रणात्स वत्सेशं मोचयित्वा सोपचारं सान्त्वनानि भणन्, गाढबहुप्रहारतया वाहनासना-समर्थ इति, स्कन्धवाह्यं शयनमारोप्योज्जयिनीं निनाय ॥

अतिस्नेहाद्वासवदत्तायां वरगुणेष्वतिमात्रलुब्धस्य महा-सेनस्य, वत्सराजप्रतीक्षयैव कन्यार्थिभ्यो गोत्रानुगुणेभ्यो राज-कुलेभ्यो निश्चयवचनमभणित्वा कालं यापयतः, तद्ग्रहणवृत्तान्त-श्रवणेन महत्स्वप्यभ्युदयेष्वननुभूतपूर्वा मुदश्चेतसि समभूवन् । अथास्य शासनेन, विशिष्टेन सत्कारेण प्रवेशितो वत्सराजः कृत-व्रणप्रतिकारस्समुपचरितो राजपुरुषैरातपहितायां मणिभूमिकायां कल्पितनिवासोऽभूत् । शालङ्कायनप्रहितां समरावजितरत्नं वत्स-राजस्य गजबन्धनलीलासखीं घोषवतीं तु प्रद्योतो वैताल्यास्सकाशे तदात्वोपक्रान्तवीणाशिक्षणायै वासवदत्तायै दापयामास ॥

अत्रान्तरे, कौशाम्ब्यां, "नीलहस्तिनमुपस्थाप्य प्रद्योतः स्वामिनं छलयितुकाम" इति चारमुखेनाधिगतप्रवृत्तिर्मेधावी यौगन्धरायणः, प्रागेव नागवनप्रवेशादुदयनस्य सलेखं पुरुषं विस्रष्टुं तत्वरे । त्वरमाणस्य चास्य समुपागाद्धंसको नाम भर्तु-रुपस्थायकस्सर्वमतिपतितं वृत्तान्तमावेदयितुम् ॥

श्रुत्वा च स्वामिनो विपत्तिं नितरां विषण्णो निरुपाधिक-स्वामिभक्तिपरायणो यौगन्धरायणस्सकरुणमब्रवीत्— "हन्त!

भोः ! छलिता स्मः । महान्खलु भारः प्रद्योतेन भाग्यवशाल्लघु निस्तीर्णः । अद्य प्रभृति वत्सराजसचिवानां प्रतिष्ठितमसामर्थ्यमयशश्च । अहो ! जाग्रतोऽपि बलवत्तरः कृतान्तः" इति । विललाप च पुनः स्वामिनोऽवस्थान्तरं चिन्तयित्वा—"कथं महाराजोऽपि प्राकृतैः प्रधर्षणं प्राप्तः । कथं तस्मिन्मणिवलयार्हे, चापास्फालनकर्कशपर्वणि, विप्राभ्यर्चयितरि, सुहृदां श्रमेष्वाश्लेषणसत्कारप्रणयिनि, पीनांसे, भुजद्वये बन्धनं न्यस्तम् । कथमगणितपूर्वं द्रक्ष्यति प्रद्योतं स्वामी । कथं स नरलोकाभ्यर्चितशासनः श्रोष्यत्यनर्हपुरुषभाषितानि । कथं निरुद्धो बन्ध्यं धारयिष्यत्यरातिष्वमर्षम् । अद्य खलु नूनमस्य तिथिपूजनेषु देवताप्रणामकाले प्रचलिताः पटहस्थाने निगडाः स्वनन्ति । हा धिक् ! भर्तृपिण्डस्यानिष्कृतिपरैः किमस्माभिरिह प्रयोजनम्" इति । भूयस्सगद्गदं स हंसकमप्राक्षीत्—"अथ मामन्तरेण स्वामी न किञ्चिदाह" इति । हंसको न्यवेदयत्—"आर्य, अस्ति । बाष्पोपरुद्धकण्ठेन बहुकं सन्देष्टुकामेनेवास्मि भर्त्रोक्तः—'गच्छ, यौगन्धरायणं प्रेक्षस्व' इति" इति ॥

तदात्वे वत्सराजविपत्तिं श्रुत्वा सर्वमन्तःपुरं प्रचुक्षुभे । समादिशच्च प्रतीहारीमुखेन यौगन्धरायणं राजमाता—"यः खल्विदानीं सङ्कटेषु न विप्रतिपद्यते, विषमगतो न विमुह्यति, वञ्चितो न निर्वेदं गच्छति, प्रतिघातेषु नावसीदति, स खलु बुद्धिमांस्त्वमभ्यर्थ्यसे ; यः प्रथममेव वत्सस्य वयस्यः पश्चादमात्यः, 'आनयतु पुत्रकं पुत्रक' इति" इति ॥

तदा भर्तृमातृ-भर्त्रोस्सर्वसचिवमण्डलमतिक्रम्य स्वस्मिन्नेतादृशीं प्रतिपत्तिमवेक्ष्य, यौगन्धरायणो जीवितप्रदानेनापि प्रत्यानेतुं स्वामिनं व्यवस्थितमतिस्समाददे धीरमिमां प्रतिज्ञां—"मोचयामि न राजानं, नास्मि यौगन्धरायणः" इति ॥

तत्क्षण एवोन्मत्तवेषेण प्राप्तो, भरतकुले धृतवात्सल्यो भगवान्द्वैपायनो राज्ञश्शान्तिनिमित्तं भोजनोपनिमन्त्रितं ब्राह्मणजनमुद्दिश्य, "स्वैरं स्वैरमश्नन्तु भवन्तः । अभ्युदयः खल्वस्य राजकुलस्य भविष्यति" इत्युक्त्वा तिरोबभूव । तेन च परित्यक्तान् परिच्छदविशेषान् केनचिद्ब्राह्मणेनोपनीतान् यौगन्धरायणः प्रतिगृह्य, "इदानीं मदुपदेशार्थमेवासौ भगवानागतः" इति निश्चिन्वानः पर्यधात् ॥

एवमुन्मत्तवेषप्रच्छादितोऽसौ मन्त्रिमुख्यः, प्रतिज्ञया किञ्चिदिवाश्वासितां राजमातरमनुज्ञाप्य, श्रमणकवेषेण रुमण्वता, डिण्डिकच्छद्मभाजा राजवयस्येन वसन्तकेन चानुगम्यमान उज्जयिनीं प्राविशत् ॥

तत्र च नीतिवित्स गूढपुरुषांस्तेषु तेषु प्रयोगौपयिकेषु करणीयेषु व्यापारयामास । वसन्तकस्तावद्विप्र इति राजकुले उपायनादिग्रहणव्याजेन लब्धप्रवेशो बन्धनस्थितेन वोदयनेन सह नवमिवमित्रभावमापन्नस्तत्प्रार्थनया तत्र शश्वद्गमनागमनं कर्तुं प्रवृत्तः ॥

अथैकदा कालाष्टम्यां धात्रीद्वितीया शिबिकामारुह्य वासवदत्ता बन्धनद्वारस्याग्रतो भगवत्या यक्षिण्याः स्थाने देवकार्यं कर्तुं गता आसीत् । तस्मिन्दिवसे यदृच्छया बन्धनपरिरक्षकमनुमान्य बन्धनगृहद्वारे निष्क्रान्त उदयनः, पुरुषस्कन्धपरिवर्तनावस्थितायां शिबिकायां राजदारिकां प्रकाममालोकयामास । सापि सुन्दराङ्गं तं दृष्ट्वा चेतसि रागं बबन्ध ॥

एवं स्थिते प्रद्योतो, येन स्वस्मिन्नर्थिभावं प्रपन्नः प्रह्वीभवेद्वत्सराजस्तादृशमस्य स्वदुहितरि प्रेम समासञ्जयितुकामः, चिरोद्दिष्टाय वराय तस्मै वासवदत्तां—"गान्धर्वमेनां शिक्षय" इति शिष्याव्यपदेशेनानग्निसाक्षिकं प्रादात् । एवमव्याजदर्शितानुकूल्यो दैवेन वत्सराजस्तदाप्रभृति विपक्षग्रहणपरिभवमनाकलय्य बन्धनमपि प्रमदवनं संभाव्य तुल्यानुरागया राजपुत्र्या सह प्रवृत्तो रागलीलां कर्तुम् । इयेष च निजबन्धनावमानस्य प्रतिक्रियामन्विष्यन्, उपारूढेन प्रेम्णा तातपक्षपराङ्मुखीं प्रद्योतदुहितरमपहर्तुम् । वसन्तकमुखेनापि "मन्मनोरथानुगुण्येनैव निर्गमनोपायस्य समर्थनं मह्यं रोचते । समाने गमने प्रद्योतस्यावमानविशेषश्चिन्त्यते । मा कामप्रधान इति मामवमन्यस्व ।" इति यौगन्धरायणाय संदिदेश ॥

अथ सङ्केतानुरोधेन नगराद्बहिर्जनसम्पातवर्त्मनो दवीयसि कचिज्जीर्णे देवकुले स्वामिनश्चापलमन्तरेण रुमण्वद्यौगन्धरायणौ

विदितार्थौ कर्तुं तयोरागमनं डिण्डिकवेषो वसन्तकः प्रतिपालयन् अपहृतमिवात्मनो मोदकमल्लकमन्वेषमाणस्सुहृदभिज्ञानहेतोर्गूढार्थां कामप्युद्घोषणां प्रस्तुवन्नास्त। तदभिज्ञायोन्मत्तवेषच्छन्नो यौगन्धरायणः प्राविशत्। तयोश्च मोदकमल्लकानुसारिणा वाक्कलहेन परस्परमसूच्यन्त तत्तन्नयारम्भविशेषाः। उभयोरुच्चैराक्रोशशब्देन श्रमणकच्छद्मा रुमण्वानपि तत्रानीयत॥

एवं व्याजेन मिलितास्ते निर्मक्षिकमन्तर्गृहं प्रविष्टा विस्रम्भेण मिथः कथयितुमारभन्त। तदा यौगन्धरायणः स्वामिनोऽपवहनार्थं समनन्तरदिन एव प्रयोजयिष्यमाणानि संविधानान्युपवर्णयामास। "श्वः किल स्वामिनो निर्गमनं साधयिष्यते। तत्र च वसन्तकेन स्वामी प्रतिबोधयितव्यः। नैकविधैर्मन्त्रौषधिप्रयोगैः व्यामोहितो महासेनहस्ती नलागिरिश्शालासन्निकृष्टगृहोद्दीपनेन उत्त्रासयित्वा धूपैः प्रतिगजमदैश्शङ्खदुन्दुभिस्वनैश्च सहसोन्मादयिष्यते। प्रमत्ते च तस्मिन्दुर्नियन्त्रणे समन्तात् संक्षोभयत्युज्जयिनीं, निश्शरणः प्रद्योतः समुद्विग्नैः परिवारैः परिगतः स्वामिनमेव शरणमुपयास्यति। तेन च नलागिरिग्रहणार्थं बन्धनाद्विमुक्तः स्वामी घोषवतीं वादयन् तं मत्तवारणं स्वाधीनतामुपनीय तस्मिन्व्यवस्थितासनः जवेन निष्क्रमिष्यति।" इति॥

तदा सिद्धप्रायमस्मत्परिश्रमफलमिति मन्यमानाय यौगन्धरायणाय वसन्तकः काममोहितं, वासवदत्तानुगमनादृते बन्धमोक्षमप्यबहुमन्यमानं राजानं न्यवेदयत्। सर्वारम्भविघ्नकरमिमं

निरपत्रपस्य स्वामिनो बन्धनागारेऽनुपस्थितदेशकालं रागानुबन्धं श्रुत्वा खिन्नोऽपि धीमान् भक्तिमांश्चासावमात्यवर्यः "सवासवदत्तः स्वामी वा मोचयितव्यः । अनेनैव वेषेण जरावागन्तव्या" इति द्वितीयां प्रतिज्ञामङ्गीकृत्य, राज्ञो मनोरथानुरूपं निष्क्रमणं साधयितुम् उपायमन्विवेष । अथावधृतानन्तरकरणीयानामेषां सङ्घातो विभिदे ॥

ततस्सङ्कल्पितेन विधिना उन्मादिते नळागिरौ अशिक्षितदुर्निग्रहे नगरीमुद्भ्रमति, सुहृदां स्वस्य च जीवितसंशयमापतितमुद्वीक्ष्य संभ्रान्तो महासेन उदयनं विमोचयामास । तेन च घोषवतीद्वितीयेन प्रशान्तवेगः कृतो वारणः । दुहितुरयं प्रणयीति स्वस्य च जीवितप्रदायीति कृत्वा महासेनो न पुनर्वत्सराजं निगडयामास । एवं स्थिते वासवदत्तापनयनानुकूल्याय तस्या एव हस्तिन्या भद्रवत्या निष्क्रमणं निर्वर्तनीयमिति निश्चितवतः यौगन्धरायणस्य निदेशवर्तिना तस्यैव चारपुरुषेण गात्रसेवकनाम्ना हस्तिपकेन सन्निधापितां भद्रवतीमारुह्य सवासवदत्तो वत्सराजः यौगन्धरायणोद्दिष्टेऽहनि अजाग्रत्सुप्रद्योतभटेषु निभृतं निष्क्रान्तः निमिषमात्रातिलङ्घितबहुयोजनः एकाह एव नगराद्विन्ध्यवनम् वनात्कौशाम्बीं चोपजगाम ॥

अत्रान्तरे, "वासवदत्तायाः जलविहारार्थं भद्रवतीमुपस्थापय" इति पानमत्तमाहिण्डमानं गात्रसेवकमनुरुन्धानः कश्चिद्भटः, "एष भर्ता वत्सराजः वासवदत्तां गृहीत्वा निर्गत" इति

महान्तं नगरशब्दमश्रृणोत् । अवागच्छदपि क्रमेण गात्रसेवकं यौगन्धरायणस्यैव गूढपुरुषम् । ततः किन्नु खल्वेतदिति विस्मयमाने तस्मिन्प्रावर्तत महद्युद्धं, ससंभ्रमं वत्सराजपदवीमनुपततां प्रद्योतसैन्यानां निजनिजस्थानेभ्यो निष्पतितानां च निरोधमुक्तानामिव कृष्णसर्पाणां यौगन्धरायणपुरुषाणाम् । तदानीं, सुदूरमपवाहितवत्सराजो यौगन्धरायणस्संहृत्योन्मत्तवेषमासिद्वितीयः प्रद्योताक्षौहिणीं विगाह्य विहरन्मुहूर्तं तस्या नासीररयं निरुरोध । किन्तु प्रतिपक्षहस्तिनो दन्तावघट्टनेन मध्ये विपन्नासिः तदात्वेऽप्यनिवृत्तपदः धुरि प्रयुञ्जन्नसौ ग्रहणमुपगतः । सर्वमेतन्निशाम्य स भटः "प्राकारतोरणवर्जं कथमियं नगरी कौशाम्ब्येव संवृत्ता" इति विचिन्तयन् गत्वाऽमात्याय भरतरोहकाय वृत्तान्तं निवेदयामास ॥

अथ वत्सराजमपनीय निस्तीर्णप्रतिज्ञाभारस्य भर्तृपिण्डानृण्यं गतस्य, फलानुमितैः प्रतिपक्षामात्यमतिविभ्रमहेतुभिस्तैस्तैर्नयप्रयोगैश्च विस्मापितजगतः, यौगन्धरायणस्य, तदानीं, शस्त्रदोषाद्रणे ग्रहणमपि श्लाघनीयमासीत् । रमणीयतरः खलु प्राप्तमनोरथानां विनिपातः । तदा, बध्वा नीयमानमेनं पूर्वमुन्मत्तवेषेण रथ्यासु दृष्टपरिधावनं परिणतौ तु विभाव्यमानमाहात्म्यमाश्चर्यकृतसम्मर्दाः दर्शनाभिलाषिणः पौराः परिवव्रुः । ततो नीतोसावायुधागारममात्यनिदेशेन पुरुषगुप्ते देशेऽवस्थापितः सोपहासमचिन्तयत् । "अहो प्रद्योतमन्त्रिणामकाले जागरणम् ।

अग्निं बध्वा वत्सराजाभिधानं
　　यस्मिन्काले सर्वतो रक्षितव्यम् ।
तस्मिन्काले सुप्तमासीदमात्यैः
　　नीते रत्ने भाजने को निरोधः ॥" इति ॥

अस्य च नीतिगहने प्रमुग्धो भरतरोहकः, नडागिरिणा यद्यपि गृहीतुं शक्या भद्रवती, वत्सराजं मुक्त्वा नापरस्तं वाहयितुं समर्थ इति अनुसारे निराशो भूत्वा बन्धनापन्नं यौगन्धरायणमुपगम्य, "छलेनापवाहितवत्सराजस्य ते कियत्यात्मसम्भावना ? अपि च महासेनस्य प्रतिकूलं कृत्वा कौशाम्बीगतोऽपि स किं स्वस्था भविष्यति" इत्यवाभत्सयत् । तदा सापहासं प्रत्यवादीत् यौगन्धरायणः, "किं न प्रस्तुता भवता पूर्वं सालवृक्षोपरचितनागाश्रिता वञ्चना ? युक्तमेव हि कृतं मया वारणनिग्रहाश्रितां वञ्चनां प्रतिकल्पयता । यत्तु कौशाम्बीगतं वत्सराजं प्रति विभीषिकाभिधीयते, तत्परिहास्यं भवति । भवतामग्रत एव स नन्वपवाहितः । स्वदेशे तस्य रक्षणं किन्नु दुष्करम् । समूलं वृक्षमुत्पाट्य शाखाच्छेत्तुं कुतश्श्रम" इति ॥

तस्य सावष्टम्भगम्भीरापहासचतुरमात्मनो नीतिविवरणमवधार्य विस्मितो भरतरोहकः पुनस्साक्षेपमाह । "शिष्येति प्रतिगृहीतायाः महासेनदुहितुर्यदत्तापनयनं कृतं युक्तेयं भोस्तस्करप्रवृत्तिः ।" तमित्थं समादधे यौगन्धरायणः । "मा मा भवानेवम् । विवाहः खल्वेषस्स्वामिनः ॥

भारतानां कुले जातो, वत्सानामूर्जितः पतिः ।
अकृत्वा दारनिर्देशमुपदेशं करिष्यति" ॥ इति ॥

अतः परं निरुत्तरो भरतरोहकः तस्य स्वामिभक्त्या नयप्रागल्भ्येन चाप्युपारूढबहुमानः तं पारितोषिकं भृङ्गारं प्रतिग्राहयामास ॥

अथ तस्मिन्नवसरे वासवदत्ताहरणपरिभवेन शोकाभिभूतहृदया महासेनमहिष्यङ्गारवती प्रासादाच्छरीरं मोक्तुकामेति महान्हा हाकारस्समुद्भून् । तां च प्रद्योतः पर्यवस्थापयामास । "क्षत्रधर्मेणानवद्यस्ते दुहितुर्विवाहः । सर्वथैव च नाऽभिमतोऽयं वरः । किमिदानीं हर्षकाले सन्तप्यस" इति ॥

ततस्तस्याः परितोषाय विमोचितस्य यौगन्धरायणस्य समक्षमेव चित्रालिखितयोर्वासवदत्ता-वत्सराजयोः परिणयविधिं निर्वर्तयामास । यौगन्धरायणोऽपि ससत्कारं तेन विसर्जितः कौशाम्बीमाययौ ॥

(२)

प्रकृत्यैव सचिवायत्तसिद्धिर्वत्सराजो वासवदत्तालाभात्परं भोगेष्वेकान्तमासक्तमना मान्मथेष्वेव रसक्रमेष्ववगाढः अनान्तःपुरिकं कमपि वृत्तान्तं न चेतयामास । एवमजिगीषोस्सततमनुद्यतस्य चास्य राष्ट्रमण्डलं छिद्रान्वेषिणा आरुणिनाम्ना विपक्षेण

शनैराक्रम्य प्रक्षीणतामनायि । तादृशस्य व्यसनिनो राज्ञस्सचिवभावेन स्वस्मिन्नायत्तप्रजापालनविधिः खिन्नो यौगन्धरायणः सेनापतिना रुमण्वता सह मन्त्रयामास । "स्त्रीमद्य-मृगया-तत्परस्य निश्चिन्तं तिष्ठतः स्वामिनोऽत्र परिशिष्टं कौशाम्बीमात्रमपि राज्यं किं न रन्ध्रप्रहारिभिः परिपन्थिभिरपह्रियेत । यत्सत्यं नीतिपराङ्मुखस्य राज्ञोऽर्थसिद्धिस्सचिवायत्ता । तदावाभ्यां यथाऽसौ क्रमागतं समग्रं राज्यं प्रतिपद्येत तथा प्रयतितव्यम" इति । तदर्थं च, सहायबलसाध्यत्वात्पृथिवीजयस्य, मगधराजस्य बलिनो दर्शकस्य मैत्रीभावं संपादयिष्यन्, आदेशिकै राज्ञो देवी भवित्रीत्यादिष्टां तद्भगिनीं पद्मावतीं कथञ्चित्स्वामिनो घटयितुं निश्चिकाय ॥

"धरमाणायां वासवदत्तायामुदयनो नान्यां परिणेष्यति दर्शकोऽपि न पद्मावतीं दास्यति" इति समर्थ्यासौ धिषणोपहसितधिषणो वत्सेश्वरामात्यो देवीं च्छन्नमपवाहयितुं कञ्चिदुपायमन्विर्येष । तथा च कदाचिल्लावाणकावासिते राजनि मृगयानिष्क्रान्ते देवीवासगृहमादीप्य "हा हा वासवदत्ता ग्रामदाहेन दग्धा । यौगन्धरायणोऽपि तामभ्यवपत्तुकामस्तत्रैव पतितः" इति रुमण्वता व्याघोषयामास । वासवदत्तां तु तत्तदुक्तिभिः स्वनीतिसिद्धौ साहाय्येऽभ्यर्थ्यानुमान्य च यौगन्धरायणो मगधदेशं निनाय ॥

तत्र च परिव्राजकलिङ्गोऽसाववन्तिका-व्यपदेशया तया सह कञ्चिदाश्रमपदमुपाजगाम । तदानीमाश्रमस्थां राजमातर-

मभिवादयितुं तत्रैवागतां दर्शकस्य भगिनीं पद्मावतीं तौ ददृशतुः । तां भर्तृदारानभिलषतो यौगन्धरायणस्य, "प्रद्योतेन दारकस्य कारणादियमभ्यर्थ्यते" इति चेटीजनेन तापस्यै निवेदितामेनां शृण्वन्त्या वासवदत्तायाश्च, तस्यां, अभिजनानुरूपेण रूपेण रूपानुगुणया गुणसम्पदा च विशेषिता स्वकीयेति महती प्रीतिरुदपद्यत ॥

अथ कृतगुरुजनवन्दना धर्मरतिर्मगधराजपुत्री मुनिजनाभीष्टपूरणेनात्मानुग्रहमिच्छन्ती कञ्चुकिमुखेन "कस्याद्य किं दीयताम्" इति व्याघोषयामास । तं क्षणमुपलभ्य यौगन्धरायणस्समुपगम्यायाचत । भोः अहमर्थी । प्रोषितभर्तृकामिमां मम स्वसारमिच्छाम्यत्र-भवत्या कञ्चित्कालं परिपाल्यमानाम् । इष्टधर्मप्रचारेयं धीरा राजदारिका मद्भगिन्याश्चारित्रं रक्षिष्यति" इति । दुःखं न्यासस्य रक्षणमिति विदन्त्यपि सत्यवादिनी पद्मावती प्रथममुद्घोष्य न पुनर्विचारयितुं युक्तमिति तदभ्यर्थनामङ्गीचकार । विभाव्य च वासवदत्तां "यदीदृश्यस्या आकृतिर्नूनमियमभिजनवती" इति निश्चित्य सा राजपुत्री तस्यां सविशेषां बहुमतिमादधे ॥

यौगन्धरायणोऽपि "अर्धमवसितं कार्यस्य । यथा मन्त्रिभिस्सह समर्थितं दिष्ट्या तथैव परिणतम् । प्रतिष्ठिते च स्वामिनि वासवदत्तामुपनयतो मे पद्मावती विश्वासस्थानं भविष्यति; या सिद्धैरादिष्टा नरपतेर्महिषी भविष्यतीति । सुपरीक्षितमेवैतन्

यत्किल सिद्धवाक्यान्युत्क्रम्य न गच्छति विधिः" इति सोच्छ्वासं चिन्तयन् सर्वाननुज्ञाप्य ततो निर्जगाम ॥

अथ लावाणके मृगयानिवृत्तो वत्सराजः मन्त्रिभ्यो देवीदाहं श्रुत्वा अशनिहत इव भूमौ निपत्य "हा वासवदत्ते! हा अवन्तिराजपुत्रि! हा प्रिये! हा प्रियशिष्ये!" इति बहु विलपन् तस्याश्शरीरोपभुक्तानि दग्धशेषान्याभरणानि परिष्वज्य मोहमुपगतः । प्रबुद्धश्च तस्मिन्नेवाग्नौ प्राणान्परित्यक्तुमयतत । ततो महता यत्नेन मन्त्रिभिर्निवारितः वासवदत्तागतयैव चिन्तया "इह तया सह हसितं, इह तया सह कथितं, इह तया सहोषितं, इह तया सह कुपितं." इत्येवं विलपन् सर्वावस्थास्वपि निरन्तरमनुवर्तमानेन रुमण्वता कृच्छ्रेण पर्यवस्थाप्यमानः विरहानलोष्मदुस्सहान् प्रस्थितान् प्राणान् कथञ्चिन् धारयन् तस्थौ । तादृशस्य तस्य लावाणकावस्थितिरनुकलं वासवदत्तामनुस्मारयित्वा विरहानलं सन्धुक्षयतीति कृत्वा हृदयविनोदार्थं तममात्याः तस्मात् ग्रामादपवाहयामासुः । समानयन्नपि तं यौगन्धरायणमन्त्रमनुतिष्ठन्तस्ते दर्शकस्य विषयान् मगधान् ॥

एवमन्यप्रयोजनेनागतस्योदयनस्याभिजनविज्ञानवयोरूपादिकं दृष्ट्वा कालज्ञो दर्शकः स्वभगिनीं तस्मै प्रतिपादयितुमर्थयामास । पद्मावत्यपि कृतदूतसंपातेन प्रद्योतसुतेन सम्बन्धमनिच्छन्ती मृतामपि प्रियामनुस्मृत्य दारुणां वियोगदशामनुभवन्तं, सानुक्रोश इत्युदयनमेव भर्तारं मनसा चकाङ्क्ष । अमात्यानां

निर्बन्धवशाद्वत्सेशो दर्शकसम्बन्धमनुमेने । अथासन्नविवाहस्स दर्शकगृहानुपागमन । तत्र च निजविभवोचितं दर्शकेनाभ्यर्चित: पद्मावत्या: पाणिं जग्राह ॥

अथ तस्मिन्नेव राजकुले वसन्त्या: निजगुणै: पद्मावत्या: परां बहुमतिपदमारूढाया:, अवन्तिकाव्यपदेशाया वासवदत्ताया:, भर्तु: पुनर्विवाह इति महान हृदयज्वरोऽवर्तत । "अहो आर्यपुत्रोऽपि नाम परकीयस्संवृत्त:" इति सा दूयमाना शश्वदुत्ताम्यति स्म । विह्वलहृदयायास्तस्या बहुषु वाक्प्रमादेषु आत्मन: स्वरूपं कृच्छ्रगोप्यमासीत् । निरुत्साहा च सा विवाहामोदसंकुलमन्त:पुरं परित्यज्य विजने संविष्टा स्वस्य भागधेयमनुचिन्त्याखिद्यत । तस्याश्शोकेनान्धीबभूव हृदयम् । अमण्डितशरीरा नीहारप्रतिहतेव चन्द्रलेखा शोच्यदर्शनतामवहत् । निद्रामलभमानायास्तस्या: शय्यायामपि दु:खविनोदनमसम्भावनीयमासीत् । केवलमार्यपुत्रदिदृक्षया विरहनिपीडितानपि प्राणान्दधार ॥

अत्रान्तरे वत्सराजो द्वित्रदिनानि प्रवृत्तनृत्तगीतं प्रमोदमेदुरमुद्वाहमहोत्सवमनुभवन् नवपरिचयहारिण्या पद्मावत्या सहचरितो यथासुखं श्वशुरगृह उवास । परं तु बहुगुणकमनीयापि पद्मावती तं वासवदत्तां विस्मारयितुं न पारयामास । स तु दक्षिणतया अग्रत: पद्मावतीं रञ्जयन्नपि लब्धैकान्त्यस्सख्या वसन्तकेन सह वासवदत्ताविरहपर्युत्सुकेन मनसा तद्गुणानेव वर्णयन्नास्त । एकदा अलक्षितागते पद्मावती वासवदत्ता च

उपवने तादृशं स्वैरमनयोरालापमुपशुश्रुवतुः । तदा विदूषकोऽपृच्छत्—"भोश्शून्यं खल्विदं प्रमदवनम् । पृच्छामि भवन्तं किमपि प्रष्टव्यम् । का भवतः प्रिया तदानीं तत्रभवती वासवदत्ता इदानीं पद्मावती वा" इति । अनेन प्रश्नेन बहुमानसङ्कटे पातितः स्वभावदक्षिणो राजा न प्रतिवक्तुं शशाक । किंतु वयस्येन सशपथं बलात्कारेण पृष्टः उदैरयत्—"का गतिः श्रूयताम्—

पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः ।
वासवदत्ताबद्धं न तु तावन्मे मनो हरति ॥" इति ।

तच्छ्रुत्वा अभिजाता पद्मावती अनसूयन्ती "सदाक्षिण्यो भर्ता" इति तस्मा अधिकतरं पिप्रिये । पत्युरभ्युदयापेक्षया अङ्गीकृतविरहदुःखा वासवदत्ता निजानपेतं भर्तृहृदयमालक्ष्य दत्तवेतनेव परिखेदस्य समाश्वसत् ॥

अनेन परिहासेन स्मृतवासवदत्ता-वृत्तान्तस्य नवमिव विरहदुःखमनुभवतो राज्ञो नयनं बाष्पायमानमभवत् । तदा "उत्कण्ठितं भर्तारं अवेक्षस्व" इति पद्मावतीमुक्त्वा वासवदत्ता निरगच्छत् । पद्मावत्यपि विदूषकेण नलिनीपत्रेणानीयमानं मुखोदकं तस्य हस्तात्स्वयं गृहीत्वा राजानमुपासरत् । तामुपस्थितां दृष्ट्वा संभ्रान्तो राजा दक्षिणत्वात्—

इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत् ।
कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः ॥ इति समर्थयन् अश्रुकारणमित्थं व्याचख्यौ ॥

शरच्छशाङ्कगौरेण वाताविद्धेन भामिनि ।
काशपुष्पलवेनेदं साश्रुपातं मुखं मम ॥ इति ।

पद्मावती तु तस्य दाक्षिण्येन तुतोष । ततो, जामातरमग्रतः कृत्वा मगधराजस्य सुहृज्जनं द्रष्टुं योग्यः अपराह्णकालः समुपस्थित इति पद्मावतीमापृच्छ्य सवयस्यो वत्सराजो राजसभामभिप्रतस्थे ॥

अथान्येद्युर्निशायां शीर्षवेदनया दुःखिता पद्मावतीति तस्याः समुद्रगृहके शयनीयं रचितमासीत् । तत्र तां वेदनायास्सह्यतां प्रष्टुं सवसन्तको राजा गतः । गत्वा चाव्याकुलप्रच्छदामक्लिष्टोपधानामास्तृतसमां शय्यामालोक्य न तावदागता पद्मावतीत्यनुमिमानो राजा मुहूर्तं प्रतिपालयामीति तामेव शय्यामधिशिश्ये । शयानश्च निद्राहेतोरुज्जयिनीसम्बद्धां कामपि कथामुपक्रामति वयस्ये, हुतवहोपहारीभूतामवन्तिराजतनयामनुस्मारितः विरहातुरस्सशोकमित्थं विललाप ॥

स्मराम्यवन्त्याधिपतेस्सुतायाः
प्रस्थानकाले स्वजनं स्मरन्त्याः ।
बाष्पं प्रवृद्धं नयनान्तलग्नं
स्नेहान्ममैवोरसि पातयन्त्याः ॥

अपि च—

बहुशोऽप्युपदेशेषु तया मामीक्षमाणया ।
हस्तेन स्रस्तकोणेन कृतमाकाशवादितम् ॥ इति ।

अनेन व्याक्षेपेणावघट्टितशोकशल्यं राजानं प्रेक्ष्य विदूषकोऽन्यां कथां कथयितुमारेभे । कथयति चास्मिन शनैरुदयनो निद्रापरवशो बभूव । सुप्तं तमवगत्य "अतिशीतलेयं वेला, प्रावारकं गृहीत्वा आगमिष्यामि" इति विदूषकोऽपि निर्गतः ॥

क्षणेन, अस्वस्थां पद्मावतीं कथाभिर्विनोदयितुमाकारिता अवन्तिका समुद्रगृहकं प्रविश्य मन्दया दीपप्रभया सुप्तं राजानं पद्मावतीं मत्वा शयनसंविभाग उपविश्य सस्नेहं परामृशन्ती परिषस्वजे । तदा राजा उत्स्वप्रायते स्म—"हा वासवदत्ते, हा प्रिये, हा प्रियशिष्ये! देहि मे प्रतिवचनम्" इति । तच्छ्रुत्वा "आर्यपुत्रः खलु, न तावत्पद्मावती" इति अवधार्य वासवदत्ता सरभसमुदतिष्ठत् । आशशङ्के च नितान्तचकिता सा साध्वी—"किं नु खलु दृष्टास्मि । महान्खल्वार्ययौगन्धरायणस्य प्रतिज्ञाभारो मम दर्शनेन निष्फलस्संवृत्तः" इति । पुनस्तद्वदेव विलपन्तं समीक्ष्य च समाश्वसत् । "दिष्ट्या स्वप्रायते खल्वार्यपुत्रः" इति । ततो "नात्र कोऽपि जनः । यावन्मुहूर्तं स्थित्वा दृष्टिं हृदयं च तोषयामि" इति सकरुणस्नेहं भर्तारं निध्यायन्ती तत्र क्षणमवतस्थे । अथ भूयोऽप्युत्स्वप्रायमानो राजा कुपितामिव प्रियां प्रसादयन् हस्तौ प्रसारयामास । यौगन्धरायणमननुज्ञाप्य

स्वप्रकाशनमनिच्छन्ती सा साध्वी—"चिरं स्थितास्मि । कोऽपि मां पश्येत् तद्गमिष्यामि" इति मत्वा प्रतिष्ठमाना शय्यावलम्बितं राज्ञो हस्तं शयनीय आरोप्य सत्वरं निरगात् ॥

अथ स्पर्शविशेषेण प्रबुद्धो राजा सहसोत्थाय "वासवदत्ते तिष्ठ, तिष्ठ" इत्यनुधावन् सम्भ्रमवशात् द्वारपक्षेण ताडितो व्यषीदत् । तदानीं व्यामुग्धस्स प्रियादर्शनं स्वप्नं वा भ्रमं वा भूतार्थं वा न परिच्छेत्तुं शशाक । उपसृत्य च वसन्तकस्तं, "असम्भावनीयमेतत् चिरात्खलूपरता वासवदत्ता । सन्ततं तामेव चिन्तयतस्तव स्वप्नविभ्रमोऽयं भवेत् । अथवा अस्मिन्राज-कुले अवन्तिसुन्दरी नाम यक्षिणी प्रतिवसति । सा त्वया दृष्टा भवेत् ।" इत्युपजहास । तं प्रत्याययन्नाह हर्षविषादविह्वलान्तरङ्गो राजा—"न न,

स्वप्नस्यान्ते विबुद्धेन नेत्रविप्रोषिताञ्जनम् ।
चारित्रमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम् ॥

अपि च वयस्य पश्य पश्य—

योयं सन्त्रस्तया देव्या तया बाहुर्निपीडितः ।
स्वप्नेऽप्युत्पन्नसंस्पर्शो रोमहर्षं न मुञ्चति ॥" इति ॥

अथ च यथा यथा चिन्तयति स्म तथा तथा दृढतरं स वासवदत्तां धरमाणामज्ञासीत् । कदाचित्सा प्रकाशमेष्यतीति मनोरथमुल्लिलेख च ॥

ततो निर्वृत्ते विवाहमङ्गले सपरिवार उदयनः अवन्तिकामुखसखीजनानुगतया पद्मावत्या सह पर्युत्सुकप्रकृतिमण्डलाभिनन्दितागमनः स्वराजधानीं प्रतिनिववृते । अत्रान्तरे रुमण्वान् दर्शकसाहाय्येन समाहृतं महद्बलमाकर्षन्नारुणिमभिमुखीभूयाभिहत्य च सङ्गरे तदपहृतं वत्सराज्यं राज्ञे प्रत्यानिनाय ॥

राज्यलाभप्रवृद्धोदयोऽप्युदयनः कदाचित्—"नर्मदातीरे गुल्मलग्ना दृष्टा" इत्युपनीतायाः वासवदत्ताङ्कोपलालितायाः घोषवत्या दर्शनेन प्रतिबोधितविरहव्यथः, "तां तु देवीं न पश्यामि यस्या घोषवती प्रिया" इति विलपन् नितरामतप्यत ॥

एवं गते महासेनः उपरतां दुहितरं तद्विरहेण दुःखितं जामातरं च श्रुत्वा तस्योत्कण्ठाविनोदार्थं, यत्र चित्रफलके पूर्वं वासवदत्तामालिख्य विवाहो निर्वर्तितः तं वासवदत्ताधात्र्या हस्ते समर्प्य सकाञ्चुकीयां तां प्रेषयामास । धात्रीकाञ्चुकीयौ वत्सराजस्सबहुमानं महासेनस्य देव्या अङ्गारवत्याश्च कुशलमन्वयुङ्क्त । काञ्चुकीयस्सर्वगतं कुशलं निवेद्य परापहृतस्य राज्यस्य प्रत्यानयनेन वर्धमानं महासेनवचसा उदयनमभिनन्दयामास । धात्री चाङ्गारवत्याः प्रेमानुशयकरम्बितं सन्देशमचकथत् । तदा महासेनाङ्गारवत्योः कन्यापहारिणि स्वस्मिन् तस्यामप्युपरतायामनिवृत्तां स्वीयत्वसम्भावनां निरीक्ष्य शोकानुतापलक्ष्यहृदयो वत्सराजस्तां परिणतिमनुचिन्त्य वैक्लव्यमगमत् । तं पर्यवस्थापयन्नाह काञ्चुकीयः—"उपरताप्यनुपरता महासेनपुत्री एवमनुकम्प्यमाना भर्त्रा ।

अथवा—

क: कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति ।
एवं लोकस्तुल्यधर्मो वनानां
काले काले छिद्यते रुह्यते च ॥" इति ॥

तदानीं तस्य चित्तविनोदनार्थमुपप्रेषितं आलिखितवासवदत्ताप्रतिच्छन्दं चित्रफलकं तस्मै धात्री उपानयत् । तत्सबहुमानं राज्ञा सह निर्वर्णयन्ती पद्मावती प्रहृष्टोद्विग्ना सप्रत्यभिज्ञमाह—"आर्यपुत्र, अस्याः प्रतिकृत्यास्सदृशीह प्रतिवसति । या किल मम कन्याभावे केनापि ब्राह्मणेन स्वभगिनिकेति न्यासतया निक्षिप्ता" इति । तदा "किमियं वासवदत्ता भवेत् उत विप्रस्य भगिन्येव । यदि विप्रस्य भगिनी व्यक्तमन्या भविष्यति । अथवा दृश्यते खलु परस्परगतं रूपसादृश्यं लोके ।" इति विचिकित्समाने राजनि, यौगन्धरायणो यवनिकान्तरित उपसृत्य न्यासप्रत्यर्पणं पद्मावत्या अयाचत । राजा चावन्तिकामानाययामास ॥

ततः परकलत्रदर्शनं परिहरन् उदयनः साक्षिमान् न्यासो निर्यातयितव्य इति वासवदत्ताधात्रीं काञ्चुकीयं च तत्राधिकरणं कल्पयामास । धात्री त्ववन्तिकां निर्वर्ण्य "अहो भर्तृदारिका वासवदत्ता" इति साश्चर्यमाचक्रन्द । तदा सम्भ्रान्तो राजा "कथं महासेनपुत्री । तत्प्रविशत्वभ्यन्तरम्" इत्याज्ञपत् । यौगन्ध-

रायणस्तु "न खलु न खलु प्रवेष्टव्यम् । मम भगिनी खल्वेषा । भो राजन्—

भारतानां कुले जातो विनीतो ज्ञानवाञ्छुचिः ।
तन्नार्हसि बलाद्धर्तुं राजधर्मस्य देशिकः ॥" इत्याचिक्षेप ।

"भवतु पश्यामस्तावद्रूपसादृश्यम्" इति वदन् राजा यदा यवनिकां संक्षेपयामास तदा यौगन्धरायणो वासवदत्ता चोपसृत्य राज्ञो जयमुदीरयामासतुः । तौ च पश्यन्नुदयनः किन्नु सत्यमिदमुत स्वप्न इति विस्मयमानः परिषस्वजे ॥

ततो यौगन्धरायणस्तस्य पादमूले पतित्वा "स्वामिन् देव्यपनयेन कृतापराधः क्षम्यतामयं जनः" इति प्रार्थयामास । तमुत्थाप्य प्रहृष्टो वत्सराजस्सप्रेमाश्रुगद्गदमिदमुदैरयत्—

मिथ्योन्मादैश्च युद्धैश्च शास्त्रदृष्टैश्च मन्त्रितैः ।
भवद्यत्नैः किल वयं मज्जमानास्समुद्धृताः ॥ इति ॥

पद्मावत्यपि सखीजनसमुदाचारेण दूषितां वासवदत्तां शीर्षेण प्रसादयामास ॥

अथ यौगन्धरायणः स्वनीतिप्रयोगमान्तं राज्ञः स्पष्टीचकार । स्वयमेवैतत्कुशलं महासेनाय निवेदयितुं सधात्रीकाञ्चुकीयो राजा उज्जयिनीं ययौ । एवं सर्वकार्यधुरन्धरेण यौगन्धरायणेन प्रत्यवेक्षितयोगक्षेमो वत्सराजः वासवदत्ता-पद्मावतीभ्यां सह यथा मनोरथं रममाणस्सुचिरं मुमुदे ॥

॥ अथाविमारकचरितम् ॥

वैरन्त्यनगरेशितुस्सुयोधनात्मजस्य राज्ञः कुन्तिभोजस्य निरवद्यपेशलाङ्गी कुरङ्गी नाम समग्रैर्निजरूपगुणैरसमाना भासमाना दुहिता समास्त । बहवस्तां स्वस्वतनयनिमित्तमर्थयमाणा राजानः कुन्तिभोजाय दूतसंप्रेषणमकार्षुः । तत्र च कन्यापित्रा सौवीरराज-काशिराजौ स्वभगिनीपती सम्बन्धयोग्याविति चिन्तितौ । अनयोरपि मध्ये देवीभ्रातृत्वेन सौवीरेन्द्रो गुणाधिक इति तत्पुत्रं विष्णुसेनमेव जामातृत्वेन वरीतुं राज्ञो मनीषा आसीत् । परं तु स प्रथममेव पुत्रस्य कारणात्प्रेषितदूतः "अतिबाला वर्तते कन्या । समयः प्रतिपाल्यताम्" इति व्यपदिश्य प्रतिसन्दिष्टः पुनरपि काले दूतप्रेषणं नाकार्षीत् । चारपुरुषैश्चावधारितं, यत्सौवीरराजस्सपुत्रदारः किमप्यदर्शनीयतां गतः । अमात्याः कार्याणि वर्तयन्ति स्मेति । एवं गते तत्कालसन्निहितः काशिराजदूतः राज्ञो विशेषतः पक्षपातपात्रमभूत् ॥

अत्रान्तरे कदाचित्सपरिजना राजदुहिता गत्वोद्यानं यथासुखमाक्रीड्य च निवर्तमाना दासीदासहसितकथितश्रवणबृंहित-

मदेन निपातितनिहतसादिपुरुषेण क्षितिरजोऽवगुण्ठिताव्यक्तमूर्तिना बन्धनपरिभ्रष्टेनाञ्जनगिरिनाम्ना मत्तहस्तिना अभिमुखीभूय परित्रासिता । अथ प्रद्रुतेषु प्राकृतजनेषु हाहाकारमात्रप्रतीकारासु स्त्रीषु कश्चिद्दर्शनीयाकृतिर्दाक्षिण्यवांस्तरुणः हस्तिनाऽभिभूयमानायास्तस्या अभयं प्रदाय निर्विशङ्कमासादितवांस्तं द्विपवरम् । ततस्स ललितकरतलताडनप्रकोपितमेनं स्वस्मिन्नभिमुखीकृत्य सुदूरमपवाह्य मुहूर्तमनादरतः प्रियवयस्येनेव तेन व्यालेन निवर्तनानुवर्तनैर्गतिविशेषैः तं विमोहयन् चिक्रीड । अथ राज्ञो मन्त्रिभिर्हस्तिनीभिरुपलभ्य गजशालां प्रवेशितेऽञ्जनगिरौ निवृत्तस्स पुरुषः लज्जित इव तेन कर्मणा महाजनप्रशंसामसहमानः समवनतशिरस्कः स्वमेवावासं गतः ॥

तस्य चान्त्यजं स्वमपदिशतः प्रकृतिमन्वयं च परीक्षितुं भूतिकनामा कुन्तिभोजामात्यो व्याप्रियते स्म । परीक्ष्य च यावदुपलब्धमित्थं समर्थयामास ।—"नायमन्त्यज इति प्रत्येतुं शक्यम् । केनापि कारणेनात्मानमन्वयं चाच्छादयति । यद्येवं मानुषदुर्लभेन रूपेण विप्रनिर्विशेषेण भाषितेन क्षात्रेण तेजसा कुलीनोचितया च सानुक्रोशतया सोऽन्त्यजो भवेत् व्यर्थोऽस्माकं शास्त्रमार्गेषु परिश्रमः । दृष्टश्च तत्रभवान् सत्पुत्रसम्पन्नस्तत्पिता । स हि व्यायामदृढविपुलोच्छ्रितांसः ज्याघातकिणाङ्कितप्रकोष्ठः प्रभानुमेयो मेघान्तर्गतो रविरिव प्रच्छन्नोऽप्यनुभावलक्ष्यराजभावः विसंवदत्यात्मनो व्यपदेशमाकृतिमहिम्ना" इति । तस्माच्च श्रुताखिल-

वृत्तान्तो राजा बहुमानाश्चर्यहर्षाकुलः "परार्थमनवेक्षितशरीरो लोकोत्तरसत्वस्स उदारकर्मा महापुरुषस्तत्वतः कीदृशो भवेत्" इति विचिकित्समानो मन्त्रिणः पुनरपि निपुणं परीक्ष्यावधारयितुमादिदेश ॥

वस्तुतस्त्वसौ युवा विष्णुसेन एव ; यः काशिराजमहिष्यां सुदर्शनायामग्निदेवेनोत्पादितः, तया च सद्योमृतप्रसवायाः स्वभगिन्यास्सौवीरेन्द्रपत्न्या रहस्समर्पितः । यश्चामानुषवीर्यबलो बाल एव सर्वलोकोत्सादनकेलीकुतूहलमविरूपधारिणमसुरं मारयामासेति अविमारकनाम्ना पप्रथे । स किल चण्डभार्गवनाम्नो महर्षेश्शापमहिम्ना वर्षभोग्यं चण्डालच्छद्मना प्रच्छन्नवासं प्राप्नवतः पितुः प्रत्यनन्तरीभवन् कुन्तिभोजस्य नगरोपान्तमध्युवास ॥

तस्मिंश्च हस्तिसंभ्रमदिवसे यदा स्वविक्रममाविष्कुर्वन्नसौ सर्वानवद्याङ्गीं कुरङ्गीं दृष्टवान् तदा प्रभृत्येवोपारूढमदनः भृशमुन्मनायमानोऽन्यादृश इव संवृत्तः । तस्यानन्यरतेश्चेतोहारिणीं तां हरिणीदृशं सङ्कल्पशतैरुल्लिखतः कल्पकल्पं दिवसमपि कृच्छ्रेण क्षिपतस्सन्तुष्टनाम्नोऽवस्थासहायस्य निजवयस्यस्यापि गोष्ठी न चित्तविनोदाय प्रबभूव । तामेव च हस्तिकरशीकरशीतलाङ्गीं भयाकुलविलोलविषण्णनेत्रां बालां स्वप्नेषु नित्यमुपलभ्य पुनर्विबुद्धो जातिस्मरः प्रथमजातिमिवोत्कण्ठाविक्लबस्सस्मार । "अहो तस्या रूपसम्पत् रूपानुरूपं यौवनं यौवनसदृशं सौकुमार्यम् । किन्वियं असामान्यसुन्दरीजनसर्गप्रतिच्छन्दो

विधातुः । किन्न्वियं सा पद्मा, पुरुषोत्तमं विहायेहावतीर्णा । अहो सर्वेषां स्त्रीगुणानामेकत्र समवायः ।” इत्येवं चपलस्य दुर्विजय्यस्य मनसः पारतन्त्र्यमुपगम्य सततं ध्यायन्नास्त ॥

राजदुहितापि प्राणदातुस्तस्य दर्शनक्षणोद्भिन्नेन सङ्कल्पयोनिना क्षिप्रमप्रतीकारां कामपि दशां समारोपिता नेच्छति स्म मण्डनं, नाहारमाद्रियते स्म, न रेमे सखीजनेन, दीर्घं निशश्वास, विविक्ते रुरोद, असम्बद्धमकथयत्, कथितं नाभिजज्ञे, रोगमपदिदेश, तन्वीबभूव, पाण्डुतामगच्छत् । गूढमिङ्गितवेदिभिस्सखीजनैरनङ्गतापपिशुनान्यवस्थान्तराण्युपलक्ष्य रहसि परिपृष्टापि सा लज्जया भयेन कुलमानेन बालभावेन चैकस्या अपि किंचिन्नावोचत् ॥

एवमतिशोचनीयामवस्थामकुलीनं कमपि युवानमन्तरेण वामशीलेन मदनेनानुप्रापितां कुरङ्गीमनुकम्पयन्त्यपि राजकुलदूषणाद्बिभ्यती सनलिनिका, धात्री, यदा अशक्यप्रतीकारामापदमेनां मत्वा खिद्यते स्म तदा, “कुलगतशङ्कां त्यक्त्वा साध्यतां यथेप्सितम् । कुलं चास्य प्राप्तकाले श्रोष्यसि” इति अशरीरा कापि वाणी समुल्ललास । सञ्जातप्रत्यये च ते प्रहृष्टे सत्वरमविमारकमुपगम्य चतुरैर्वचनोपन्यासैः कुरङ्ग्यास्तत्समावस्थतां बोधयित्वा तस्यामेव निशायां गूढं कन्यापुरं प्रवेष्टुं तमभ्यचोदयताम् ॥

स चौषधमुपलभ्येवातुरः प्रमुदितमनाः धात्र्यास्सकाशादवधारितराजगृहसन्निवेशः, “प्रतीक्ष्यतामर्धरात्रम्” इति तां

विसृज्य अस्तमिते गभस्तिमति वयस्यसन्तुष्टेन सह गुरुजनालक्षितो वासगृहान्निष्क्रम्य नगरं प्राविशन् । तत्र च यावत्प्रदोषापगमं कुत्रचित्कालं प्रतिपाल्यानन्तरं, "बहुदोषो रात्रौ च्छन्नः परगृहप्रवेशः । मा भवान् जीवग्रहणमुपगच्छतु विषमशीलानां कुन्तिभोजामात्यानाम् ।" इति स्नेहात् दर्शितशङ्काकातर्यं मित्रं ब्राह्मणं कथञ्चिदनुमान्य विरचितचोरवेषः खड्गं रज्जुं चादाय पिण्डितान्धकारभीमं रथ्यामार्गमवातरन् ॥

पर्यटंश्चासौ कौतुकेन कालरात्रिप्रतिभये तस्मिन्नर्धरात्रे, प्रसादोन्मुखविविभलीलावतीविलासमुग्धयुवजनासेवितहर्म्याग्रभूमिकासु प्रकामविशालासु प्रतोलीषु, तत्क्षणसन्धुक्षितहृच्छयार्दितस्त्वरमाणः राजकुलमासाद्य कपिशीर्षकावबद्धया रज्वा प्राकारमुल्लङ्घ्य यथोद्दिष्टमार्गेण कन्यापुरप्रासादमाससाद । तत्र च जामातृत्वेन निश्चितं काशिराजपुत्रं जयवर्माणं देवीछन्दमनुरुध्य स्वपुरीमेवानेतुं महाराजेन प्रेषितो भूतिकः प्रस्थित इति तद्भृत्यवर्गस्सर्वोऽपि कन्यापुररक्षणे किमप्यव्यग्रो बभूव । प्रासादोऽपि काष्ठकर्मबहुलतया समासन्नजालवत्त्वाच्चाविमारकस्याक्लेशारोहणीयोऽभवत् । ततो विघाट्य जालयन्त्रं तद्भवनं प्रविष्टस्स वीरः संहृत्य रौद्रवेषं विमुच्य च कक्ष्याबन्धं निजागमनं प्रतीक्षमाणां नलिनिकामुपासरत् ॥

अत्रान्तरे सखीजनसल्लापेषु जयवर्मणे स्वामुद्दिष्टां निशम्योद्विग्ना, "अहमात्मनः प्रभवामि" इति निश्चिन्वत्यपि, नलिनिका-

मुखात्प्रियजनाभिसरणमवगत्याभिजात्येनाप्रगल्भत्वेन च चारित्रभ्रंशचकिता किमपि परिप्लवहृदया कुरङ्गी दारुणेन मनोहरेण च मन्मथसन्तापेन कामप्युन्माददशामारोपिता मोहनिद्रामुपगताऽऽसीत् । तस्याः पादकमले संवाहयन्ती नलिनिका अविमारकं निशाम्य स्वागतेन प्रत्युद्गम्य च कुरङ्गीशयन उपावेशयत् । ततः किञ्चिदिव प्रबुद्धाऽनङ्गज्वरपरवशा शून्यहृदयेन—"नलिनिके, किं तेन निरनुक्रोशेन भणितम्" इत्यालप्य अनुपदं "हं परिभ्रष्टास्मि" इति भयविह्वलिता संकुचन्ती कुरङ्गी अवस्थानुगुणं परिचरन्तीं नलिनिकां सस्नेहबहुमानमालिङ्गितुमिच्छन्ती शयनोपविष्टमविमारकं बलादाकृष्यालिलङ्ग । बुद्ध्वा च मतिविभ्रमं संभ्रान्ता, "हा धिक्! हीनं चारित्रम्" इति भयेन वेपते स्म । अथ लज्जया परिचयं परिहरन्तीं भयेन विह्वलां अनुरागेण चोन्मुखीं कुसुमपलाशपेशलाङ्गीं कुरङ्गीदृशमेनां ललितसुभगैर्विदग्धोपचारैर्यथासुखं रमयन् अनृणो यौवनस्याविमारकः कियन्तं कालमलक्षितः कन्यापुर उवास ॥

एवमनुरक्तरमणीसंभोगरमणीयं सुखेन संवत्सरमेकं क्षणमिव क्षिपतोऽस्य विधिना निर्भरमसूयतेव महानन्तरायस्समुपस्थापितः । को हि नाम लोकेऽस्मिन्नविच्छिन्नधारं सुखसंपातमनुभवितुमर्हति । यदा किल दुहितुर्वृत्तान्तमन्तरेण सञ्जातशङ्काकलुषितो राजा शुद्धान्तस्य विशेषेण रक्षाविधिं व्यधित्सत, तदाप्रभृत्यविमारकस्य तत्रावस्थानं दुष्करमभूत् । असमग्रपरिचिता-

स्वादां निसर्गभूतैर्निजविलासैः प्रतिक्षणं नूतनामिव हृदयहारिणीं कुरङ्गीं सहसा परित्यक्तुमनीश्वरोऽप्यसौ निजशरीरं कुलमानं च रक्षितुं सद्योऽपसरणमन्तरा कमप्युपायान्तरमपश्यन् अग्निना भगवता पुत्रस्नेहेन प्रच्छादितो गूढं कन्यापुरान्निरगात् ॥

निर्गतश्चाविमारकः अप्रतीकारगुरुकेण विरहसन्तापेन दग्धहृदयस्तामेव प्राणसमामनुभूतमुक्तामसुलभपुनर्दर्शनामनुध्यायन् "नूनं मदपेक्षया सापि प्राणांस्त्यक्ष्यति । तया विरहितस्य मम जीवनं न केवलं दुष्करं किं तु कृतघ्नभावेनापि गर्ह्यते" इति निश्चित्य प्राणपरित्यागेन दुःखसागरं लङ्घितुकामः पर्वतशिखरमारुरोह । स तत्र मदनानलेनान्तर्बहिश्च निदाघसमयप्रचण्डेन चण्डभानुना दह्यमानः सञ्जातमूर्च्छः पतन् किमनेन जीवन्मरणेनेति क्षणमप्यतो दुर्भरं भारभूतमात्मनो देहं कान्तामेवानुस्मरन् दवाग्नौ चिक्षेप । भगवांस्तु विभावसुः मलयचन्दनशीतलो भूत्वा निर्वेदतप्तं निजतनयं ज्वालाभिः परिषस्वजे । तद्दृष्ट्वा विस्मितोऽविमारकः पुनर्भृगुपतनेनात्मघातं कर्तुमयतत ॥

तदानीं कोऽपि विद्याधरो निजकान्तया सह प्रातर्मन्दरकन्दरेष्वामोदितयौवनो हिमवतश्शोभया ततः संप्रलोभितदृष्टिः मध्याह्नसुखावहं शीतचन्दनानिलयं मलयमभिप्रस्थितो नभसि प्लवमानस्तस्मिन्नेव पर्वतशृङ्गे विश्रमितुमवातरत् । स कान्तया सह सलीलं तत्र पुष्पापचयं कुर्वन्नमर्त्यनिर्विशेषाकृतिमविमारकं विलोक्य, "किमयं विद्याधरो मन्त्रभ्रष्टः, कुतः खलु रूपमीदृश-

मन्येषाम्" इति चिन्तयन्विस्मयाविष्टः प्रष्टुमुपासदत्। अविमारकोऽपि सहसा तं दृष्ट्वा विस्मितः, "किन्नु खलु स्वप्नो मयानुभूयते। किमुतैतदन्तकाले यन्मनुष्याः पश्यन्ति" इति विशङ्कमानः पुनः स्थिरीकृत्यात्मानं, "भोः कतमकुलान्वयो भवान्" इत्यपृच्छत्। ततो विद्याधरः "श्रूयतां—अहं मेघनादो नाम विद्याधरः। इयं तावदस्मत्कुटुम्बिनी सौदामिनी नाम। अद्य भगवन्तमगस्त्यमाराधयितुं मलयपर्वते विद्याधरैरुत्सवः प्रारब्धः। तत्रावामपि सङ्केतितौ। इह मुहूर्तं विश्रम्य गमिष्याव इत्यवतीर्णौ। एषोऽस्माकं वृत्तान्तः।" इति निवेद्य पुनरप्राक्षीत्— "अथ किमर्थमिदानीं भवान् क्षितितलं देवलोकीकरोति। किमर्थमेकाकी चेहागतः" इति। तदानीं "किं नु खलु वक्ष्यामि" इत्याकुलहृदयमधोमुखं तिष्ठन्तमविमारकं प्रेक्ष्य मेघनादः "भवत्वहमेव ज्ञास्यामि" इत्यवधार्य प्रणिधानमास्थितो विद्यामावर्तयामास। विदिताखिलरहस्यश्च भागधेयवैषम्यमुपगते तस्मिन् जातानुकम्पः "सापि च तत्र जीवन्मरणमनुभवति तपस्विनी। अहमनयोरर्थे सहायो भविष्यामि" इति चिन्तयंस्तमभ्यभाषत। "भो अविमारक, सकला च भवतोऽस्माभिरवस्था विदिता। अद्य प्रभृत्यावयोस्सख्यमस्तु। कन्यापुरमज्ञातमेव प्रवेष्टुमस्त्युपायः। गृह्यतामङ्गुलीयकमिदम्। अनेन दक्षिणाङ्गुल्या धार्यमाणेनादृश्यो भवसि। वामाङ्गुल्या प्रकृतिस्थः। अपि चान्तर्हितस्पृष्टस्तत्स्पृष्टश्चान्तर्हितौ भवतः" इति। निदर्शितं च तेनाङ्गुलीयकप्रभाव-

मालोक्याविमारको हर्षाकुलो विसिष्मिये "एते खलु लोके सुखिनो नाम—

ये सञ्चरन्ति गगने वनितासहायाः
क्रीडन्ति पर्वततटेषु कृतोपदेशाः ।
सर्वं विदन्त्यपि च मन्त्रकृतैः प्रभावैः
अन्तर्हिताश्च विवृताश्च सुखं चरन्ति ॥"

इति । ततो गृहीत्वाङ्गुलीयकं, "दिव्यं स्वभावं समुपागतं स्वं मन्यमानः प्रविष्ट एवास्म्यनेन कन्यापुरं" इति प्रहृष्यन् तमव्याजसुहृदं विद्याधरमभिवन्द्य, "वशीकृतविद्यानां भवद्विधानां किमस्माभिः प्रतिकर्तुं शक्यम् । सर्वथा जीवितसंप्रदानात्क्रीतोऽहं तव भृत्यः" इति अच्छलमुदीर्य स्नेहेनानुबध्यमानं तं दयितासहायं यथेष्टगमनाय विससर्ज ॥

अथ नगरगमनाय कृतत्वरस्स पर्वतकटकादवतरन् मध्येमार्गे आत्मानमन्वेष्टुं सर्वलोकपरिभ्रमणकृतव्यवसायेन निजजीवितनिर्विशेषेण परिश्रान्ततया पादपच्छायाप्रसुप्तेन वयस्यसन्तुष्टेन समगच्छत । उभावप्यङ्गुलीयकप्रभावतिरोहिताकृती कन्यापुरप्रासादमश्रमेण विविशतुः ॥

आनिर्गमनात्प्राणसमस्य सुदूरारूढेन मदनसन्तापेन विलुलितायाः कुरङ्ग्यास्सर्वतो निरुत्सवोऽभूत् जीवलोकः । अथ निदाघान्ते प्रवृत्ते वियोगिदारुणे वर्षासमये तत्कालवल्लभैर्वकुलसरलसर्जार्जुनकदम्बनीपनिचुलप्रभृतिभिस्सखीजनानीयमानैस्सु—

रभिभिस्सुमनोभिरुन्मादिता, निदर्शितताण्डवपाण्डित्यैश्शिखण्डिभिरुद्विग्ना, सुशिक्षितशारिकोपक्रान्तवृत्तान्तकथनमपि शल्यवेधं मन्वाना, स्वनिर्वेदमजानतो रोगावस्थां प्रष्टुमागतस्य परिजनस्य चासकृन्निर्बन्धमसहमाना, विविक्ते यथाशक्यं हृदयविलोभनमिच्छन्ती सा नलिनिकाद्वितीया प्रासादशिखरमारुरोह ॥

तत्रापि पुनर्विद्युत्प्रदीपेन कालमघनात्रासिता, निर्दयेनानङ्गेन संग्लपितैः कुसुमसुकुमारैरङ्गकैरसीदन्ती, निश्वासमात्रलक्ष्यजीविता, सव्यकरालम्बितमुखकमला, अश्रुपूर्णनयना निश्चलोर्ध्वदृष्टिर्निध्यायन्ती, "किमनेन जीवन्मरणेन" इति कृत्वा प्राणपरित्यागव्यवसितमतिः, चरमं सखीप्रणयं कर्तुकामा सापदेशं नलिनिकामालिङ्ग्य, तां "शीघ्रमाकाशतोयस्नानमुपकल्पय" इति व्याजेन व्यसृजत् । अथ मातुर्वचनेन, "कीदृशी सम्प्रति शीर्षवेदना" इति प्रष्टुमागतां हरिणिकां, "निवेदय भर्त्र्यै अद्य विगतरोगा स्वस्था भवति" इत्युक्त्वा प्रतिनिवर्त्य, पश्यति निगूढं शङ्काकुले ससन्तुष्टेऽविमारके दीर्घमुष्णं निश्वसन्ती, साश्रुनयना, त्रासविलोलं परितो मुहुर्वीक्षमाणा, उत्तरीयवसनमात्मनः कण्ठ उद्बध्य यथा व्यवसितं कर्तुमयतत ॥

अथ तस्मिन्नवसरे सहसोत्थितं मेघस्तनितं श्रुत्वा संत्रासवेपिताङ्गी सा कुरङ्गीदृक् परित्रातारं शब्दापयन्ती विह्वला भूमौ पपात । तत्क्षण एवाविमारकोऽङ्गुलीयकं वामाङ्गुल्यां प्रक्षिप्योपासीदन्, "कान्ते, न भेतव्यं, न भेतव्यं" इति तामुत्थाप्या-

श्वासयामास । उवास च पुनरन्तःपुरेऽलक्षितचरोऽविश्लिष्टकामिजनोपभोग्यं जलदसमयं निर्विशन्नवनवैर्हरिणीदृशो विभ्रमविहारैः कृतार्थीकृतमनसिजस्सौवीरसूनुः ॥

अत्रान्तरे दुहितुरुद्वाहमन्तरेणानारतं चिन्तयाऽऽयास्यमानः कुन्तिभोजश्चिरेणापि सौवीरराजकुटुम्बकप्रवृत्तिमलभमानः काशिराजपुत्राय जयवर्मणे कन्यकां प्रतिश्रुत्यामात्यभूतिकेन सजननीकं तमानाय्य राजकुलेऽवस्थापयामास । उद्दिष्टश्चाभवदव्यवहितश्शोभनो दिवसस्सांवत्सरिकैः । महिषी तु पुनर्निजसोदरसूनोर्विष्णुसेनस्य वार्तामज्ञात्वा जयवर्मणे दारिकां दातुं नेच्छति स्म ॥

एवं गते सौवीरामात्यैः कुन्तिभोजाय सन्दिष्टम्—"अस्माकं स्वामी युष्मन्नगरे सपुत्रदारस्संवत्सरमेनं प्रतिवसतीति गूढपुरुषैरवगम्यते । तत्परीक्ष्यताम्" इति । अथान्वेषणे कृते सभूतिकस्य राज्ञश्चरितसंवत्सरव्रतत्वात्सुचेतनाद्द्वितीयस्सौवीरेन्द्रः प्रकाशतामयासीत् । आबाल्यादुपचितवयस्यभावयोरनयोश्चिरसमागमप्रहृष्टयोरपि तस्मिन्वत्सरे किमप्यदर्शनीयतां गतस्याविमारकस्य चिन्तया बलवती मन्युपीडा समजायत । तदा पुत्रस्नेहविक्लबो विषण्णस्सौवीरराजो निजवयस्यं प्रत्यभाषत—अनुपमबलवीर्यरूपशाली यद्यविमारकोऽद्य तव चरणरजोरञ्जिताग्रकेशः प्रणतिं कुर्यात् को नु स्यान्मद्विशिष्ट इदानीं भुवनतले । स्निग्धस्य भवतो दर्शनेन समुद्गलतीव बाष्परूपेण हृदयस्थो मम शोकः । हर्षकालेऽप्यस्मिन्नतश्चेतो न मे प्रसीदति । क्रियतां यथाशक्यं

चारपुरुषैः परितो विचयनम्" इति । भूतिकस्तु "सुपरीक्षितास्सर्वे चारगोचरा देशाः । न क्वापि दृश्यते कुमारः । नूनं समायामनुतिष्ठतीति प्रतिभाति ।" इति सवितर्कं न्यवेदयत् ॥

एवमप्रतिपत्तिमूढे ताम्यति राजकुले स भगवान् विघटनघटनापटुर्नारदः सुयोधनकुले वत्सलतया विशेषतः कुन्तिभोजेऽप्यनुकम्पित्वेनाविर्भूय प्रतिगृह्य च भक्त्युपात्तं सत्कारं व्याकुलयोस्सौवीरराजकुन्तिभोजयोरन्तःपुरस्थं कुरङ्गीरमणं कुमारमाचचक्षे । तदा, "लज्जित इवास्म्यनेन वृत्तान्तेन । केन दत्ता, कुतः परिचयः, कथं चायं प्रविष्टः कन्यापुरम् ।" इति अपवादभयाद्विमनायमानं कुन्तिभोजमाह महर्षिः—

दत्ता सा विधिना पूर्वं दृष्टा सा गजसंभ्रमे ।
पूर्वं पौरुषमाश्रित्य प्रविष्टो मायया पुनः ॥ इति ॥

अथ महर्षिणैवानुमोदिते स्वदुहितुर्गान्धर्वविधिना विवाहे कुन्तिभोजो निष्प्रतिवचनो बभूव । परं तु "त्वत्पुत्राय जयवर्मणे कन्याप्रदीयत इत्यानीता सुदर्शना कथं समाहितव्या" इति पृच्छति कुन्तिभोजे, नारदस्सुदर्शनां रहस्याहूयेत्थमबोधयत्— "ननु स्मरस्यविमारकोऽप्यग्निदेवादुत्पन्नोऽग्रजस्ते पुत्रः । अमानुषबलवीर्योऽसौ हस्तिसंभ्रमदिवसे कुरङ्गीं दृष्ट्वा जाताभिलाषः प्रथमं पौरुषमाश्रित्य तदनु मायया च तया सङ्गम्याभिरमते । कथमिदानीं ज्येष्ठपत्नी कनीयसे दीयते । सुदर्शने! अभिधीयतां

काशिराजाय जयवर्मणः कुरङ्गी वयसाधिकेति। नन्वस्ति कुरङ्ग्याः कनीयसी सुमित्रा नाम । सा जयवर्मणो भार्या भविष्यति" इति । सुदर्शनापि परितुष्टा तदभ्युपजगाम ॥

अथ महर्षिवचनात् स्वजनपरितोषणार्थमभ्यन्तरसमयमात्रमनुरुध्योपाध्यायेन कारितविवाहमङ्गलं सौवीरराजसूनुं कुरङ्ग्या सहानाययामास कुन्तिभोजः । सपत्नीकोऽविमारकस्सलज्जमुपसर्पन्महर्षिं गुरुजनं च यथाक्रममभिवाद्य तैरप्याशीर्भिरभिनन्दितः परमां मुदमवाप । ततो नारदः—विसृज्यतामचिरेण सौवीरराजः स्वदेशगमनाय । जयवर्मणे च सुमित्रा प्रदीयताम्" इत्यादिश्यानुगृह्य च सर्वान् यथेष्टगमनायोदतिष्ठन् । एवं देवर्षेरनुग्रहपूतं सर्वं राजकुलमुत्सवसंकुलमभून् ॥

॥ अथ चारुदत्तचरितम् ॥

आसीदुज्जयिन्यां कश्चिदभिरामगुणोपश्रुतमहिमा रूपयौवनशाली विप्रकुलोद्भवश्चारुदत्तो नाम श्रेष्ठिचत्वरे प्रतिवसन्सार्थवाहपुत्रः । स च समुद्रयानव्यतिकरोपार्जितापरिमितार्थसञ्चयोऽपि वादान्यकेन बन्धुमित्रातिथियाचकेषु व्ययितविभवसारो दरिद्रस्समपद्यत । ऋद्धिमनुभूय परिक्षीणस्य दुःखवाह्याऽभवत्तस्याकिञ्चिन्यदशा । उदारमतिस्स कुलपुत्रः पारितोषिकप्रदानस्थानेषु मोघीकृतनिजमनोरथप्रसरो निःस्वतया नितरां सन्दानित इव विव्यथे । तदुपकारलब्धोदयमपि सर्वं मित्रमण्डलं शनैरपचितफलात्तस्मादपससार । परं तु तस्य दरिद्रजनदुर्लभं भार्यानुकूल्यं, सुहृदो मैत्रेयस्य सर्वात्मनानुवृत्तिः, अपरिभ्रष्टसत्वता चेति समुदितं भाग्यत्रयं सन्तापोच्छित्तये प्रबभूव । लाघवकारिणीमपि रिक्तदशामनुभवन्नसावभङ्गुरावदातैर्निजगुणैस्सर्वोज्जयिनीजनाह्लादनमाततान यशोवितानम् ॥

स कदाचित्कामदेवानुयानावसरे वसन्तसेनां नाम युवजनोन्मादिनीं ललामभूतामुज्जयिन्याः प्रतिनवयौवनोन्मेषमधुरां

गणिकादारिकां दृष्ट्वा मनसिजशरशरव्यतामयासीत् । परं तु दुर्विधस्यात्मनो गणिकानुरागमाधिमात्रहेतुं पश्यन् यत्नतः प्रतिबध्यानङ्गतारल्यं प्रच्छन्नेङ्गित आस्त । तां च शकारो नाम राजश्यालकः, नृपशुरपि लक्ष्मीमदेनानुकूलयितुं बहुधा प्रायतत । आभिजात्येन केवलं, न पुनर्वृत्तेन, गणिका, वसन्तसेना, श्रियो न मुह्यन्ती, तमकुत्सयत् । अकामयत चानन्यमनसा शीलपरितोषिणी सुगृहीतनामधेयं चारुदत्तमेव ॥

अथैकदा, षष्ठ्यां, नृत्तावसाने, स्वगृहमुपावर्तमानां तां गणिकां, निशामुखनश्यदालोके पुरमार्गे, विटं पुरस्कृत्यानुपतितोऽभिकश्शकारः, अरुन्तुदैरसंबद्धैरनुचितप्रलापप्रायैरनुनयवचनैः प्रसादयितुमारेभे । "अयि वसन्तसेने, तिष्ठ तिष्ठ । अङ्गारमध्यपतितमिव चर्मखण्डं कामेन संप्रति दह्यते मे शरीरम् । सपट्टेन शीर्षेण त्वां प्रसादयामि । भर्तृपुत्रोऽहं कामयितव्यः । अन्यथा दुश्शासनस्सीतामिव केशेषु गृहीत्वा त्वामाहरामि । अथवा तीक्ष्णेनासिना शीर्षं ते छित्त्वा मारयामि । विलपन्तीमपि कस्त्वां परित्रास्यते । किं शवपत्तनेशो वासुदेवः कुन्तीसुतो जनमेजयो वा ।" इति । मूर्खमेनमनुवदन्विटोऽपि, उद्विग्नचञ्चलदृष्टिं सर्वं परिजनमालप्यासन्निहितं दृष्ट्वा—"एकाकिन्यां मयि कमकार्यमेतौ पापौ न करिष्यतः" इति भयेन विह्वलां, व्याघ्रानुसारचकितामिव हरिणीं पुरःपुरः पलायमानां, वसन्तसेनां, दर्शितक्रूराध्यवसायैरनुनयेऽपि त्रासकृद्भिः वचोभिरित्थमभ्यर्थयामास ॥

तरुणजनसहायश्चिन्त्यतां वेशवामो
विगणय गणिका त्वं मार्गजाता लतेव ।
वहसि हि धनहार्यं पण्यभूतं शरीरं
सममुपचर भद्रे सुप्रियं चाप्रियं च ॥

जनयति खलु रोषं प्रश्रयो भिद्यमानः
किमिव च रूषितानां दुष्करं मद्विधानाम् ।
अनुनयति समर्थः खड्गदीर्घः करोऽयं
युवतिवधघृणाया मां शरीरं च रक्ष ॥" इति ।

तदा अनिच्छन्तीं निर्बध्नतोरनयोरनयमसहमानेव चक्षुषामपहृतसामर्थ्या रथ्याभ्यन्तरपिण्डीभूता तामसी समजृम्भत । तेन हि वसन्तसेनामपश्यन् शकारः प्राह—"भाव नष्टा वसन्तसेनिका कदाचिदुपान्तिकस्थं नयनमात्रसंस्थुलस्य दरिद्रचारुदत्तस्य गृहं प्रविशति दुष्टदासी । तदन्विष्य गृह्यताम्" इति । तच्छ्रुत्वा "महदुपकृतं सूचितप्रियगृहसामीप्येनामित्रेणाप्यनेन वैधेयेन" इति आश्वसती वसन्तसेना स्पर्शोलक्ष्यघटनं चारुदत्तगृहद्वारमासाद्य निभृतं स्थिता ॥

तदानीं चतुष्पथे मातृभ्यो बलिमुपाहर्तुं वयस्येन प्रेषितो मैत्रेयः चेट्या रदनिकयाऽन्वीयमानो दीपहस्तो निष्क्रमिष्यन् द्वारमुदघाटयत् । अपावृत एव पक्षद्वारके वसन्तसेना पटान्तेन दीपं निर्वाप्यान्तः प्रविष्टा । तदा तत्क्षणोच्चलितरथ्यानिलस्यैव दोषं वर्णयन् मैत्रेयः पुनः प्रज्वालयितुं दीपमभ्यन्तरचतुश्शालं प्रविवेश ।

अत्रान्तरे निष्क्रामन्ती रदनिका वसन्तसेनाबुद्ध्या शकारेण केशेषु गृहीत्वा बलादाकृष्य भर्त्स्यमाना चुक्रोश। सदीपके च प्राप्ते मैत्रेये वसन्तसेनाविप्रलब्धस्यात्मनोऽविमृश्यकारित्वं बुद्ध्वा दैन्यसंकुचितवदनश्शकारः सचकितं दिशोऽवालोकयत्। पूर्वं चारुदत्ताल्लब्धजीवनो विटः तस्य गुणमहिम्नो बिभ्यत् स्वकर्मणो लज्जमानः मैत्रेयं प्रणामैः प्रसादयित्वा शकारमनापृच्छ्यैव निश्चक्राम। तदा एकाकिनमात्मानं दृष्ट्वा अन्तर्भीतश्शकारः, मैत्रेयमाहूय, "मया काम्यमाना नाटकस्त्री वसन्तसेना नाम गणिकादारिका सालङ्करणा त्वद्गेहं प्रविष्टा। श्वो न चेन्निर्यातयसि त्वया सह मे दारुणः क्षोभो भविष्यति।" इति तन्मुखेन चारुदत्तस्य संदिश्य तेन दीपिकयोद्वेजितः सत्वरमपाक्रामत्॥

अत्रान्तरे असन्निहितदीपत्वादालोकविधुरे गृहोद्देशे स्थितः शिथिलितसमाधिश्चारुदत्तः स्वधृतं प्रावारकं चतुश्शालं नेतुं रदनिकाबुद्ध्या वसन्तसेनां प्रैरयत्। सा च तद्गृह्णती "अभागिन्यहमभ्यन्तरप्रवेशाय" इति मत्वा झोषमास्त, येन चारुदत्तश्चेटीवृत्ताय विसिष्मिये। तदा रदनिकाद्वितीयो मैत्रेयः प्रविश्य शकारसन्देशमचकथत्। दर्शयामास च तद्भीतिप्रविष्टां वसन्तसेनाम्। अथोपसृत्य वसन्तसेना चारुदत्तमभिवन्द्यावसरप्राप्तमित्थमूचे—"आर्य! शरणागतास्मि। अलङ्करणनिमित्तं पापामामनुसरन्ति तदत्रैव भाण्डानि निक्षिप्य आर्येण रक्षिता गेहं गन्तुमिच्छामि" इति। चारुदत्तस्सप्रणयं पुनर्दर्शननिमित्तभूतं

तस्या अलङ्करणन्यासमभ्युपगम्य मैत्रेयरक्षितां तां गृहगमनाय विससर्ज ॥

तदुपक्रमं सा गणिका चारुदत्तमन्तरेण बलवदुत्कण्ठिता निसर्गपेशलेन मनसा सुदूरारूढां मदनबाधामुवाह । तथा हि—स्वमनोरमणगतया चिन्तया विडम्ब्यमाना यत्पारवश्येनाजल्पन् तत्रानुपदमेव सखीभिः पृष्टा किमपि न सस्मार । निरस्ताखिल-मण्डना स्नानाशनादिष्वप्यनास्थया शून्यहृदयेनावर्तत । सर्वदैव चारुदत्तस्य गुणान्सख्यनुमोदिता गृणन्ती कृच्छ्रेण कालमक्षिपत । चित्रफलके रहस्तत्प्रतिकृतिमालिख्य सस्नेहं निभालयन्ती उत्कण्ठां न्यनूनुदत । तत्सम्बन्धिनं तद्गुणानुश्रावकमपि जन-मात्मीयं मत्वोपचचार । तथा च कश्चिद्विभवमन्दतया चारुदत्तस्य निराश्रयमाहिण्डमानं संवाहकं द्यूते दशसुवर्णेषु पराजितमुत्तमर्णा-नुद्रुतमनुकम्प्य ऋणान्मोचयामास । स्वप्रसादार्थिना राजश्यालकेन पदे पदे प्रेषितानां परिच्छदविशेषाणां निवेदयितृकायापि सखी-जनाय नितरामसूयामास । "चारुदत्तः कथमभिसर्तव्यः, कथं वा तस्य समागमोऽविच्छिन्नं सुलभस्सम्पद्यते" इति चिन्तयन्ती सदा तस्थौ ॥

अत्रान्तरे दाक्षिण्येन न्यासमङ्गीकृतवतो दरिद्रस्य चारु-दत्तस्यासुरक्षिते गेहे महार्हाणामाभरणानां रक्षणे आयास इवा-भवत् । तेन हि, व्यवस्थया, षष्ठ्यां सप्तम्यां च रदनिकां स भाण्डजातं धारयामास । अष्टम्यां तु रदनिका गान्धर्वश्रवणा-

न्निशार्धप्रतिनिवृत्तस्य निद्रोत्सुकिनो मैत्रेयस्य हस्ते, "अद्य खलु त्वय्यायततेऽस्य रक्षाभरावृत्तिः" इति समर्पयित्वा न्यवर्तत। मैत्रेयो निर्बन्धवशात्तदश्रद्धया गृहीत्वा तूर्णं निद्रापरवशो बभूव॥

अथ सज्जलको नाम कश्चित्साहसिको विप्रकुलीनोऽपि वसन्तसेनापरिचारिकायां मदनिकायां जातानुरागतया तन्निष्क्रयणमूल्यं चौर्येणापि निष्पादयितुकामः तस्यां निशायां पर्यटन् भवनप्रत्ययात् चारुदत्तगृहमेव सन्धिच्छेदं विधाय प्राविशत्। विचित्य च परितस्स द्रव्यविशेषं किञ्चिदनासादयन् खिन्नः यावत्, "किन्तु खल्वागन्तुकत्वादविदितसमृद्धिविस्तरो दरिद्रगृहं प्रविष्टोऽस्मि। अथवा, यदभिजातो भवनविन्यासः, न चात्र कश्चित्परिच्छदविशेषः, तदनुभुक्तप्रनष्टविभवेनानेन भवितव्यम्। न खलु मे तुल्यावस्थः कुलपुत्रः पीडयितव्यः। गच्छामि तावत्" इति निवर्तते, तावत्, चारुदत्तमभिभाषमाणो मैत्रेय उत्स्वप्रयामास—"भोः! गृहाणैतत्सुवर्णभाण्डम्। मम ब्रह्मत्वेन शापितोऽसि, यदि न गृह्णासि। एष दत्वा विक्रीतभाण्ड इव वणिक् सुखं स्वप्स्यामि" इति। अथ सज्जलको निपुणं निरूप्य जर्जरप्रावरणैकदेशे निबद्धं च्छिद्रप्रसृतकिरणावलीभासुरं अलङ्करणं दृष्ट्वा, सुखं स्वपिहि महाब्राह्मण" इति वदन्नादाय च पटहशब्दसूचितायां प्राभातिकवेलायां सत्वरमपासरत्॥

प्रगे, प्रचलिता रदनिका भित्तौ सन्धिमार्गमुपलक्ष्य संभ्रान्ता साक्रन्दमुपगम्य चारुदत्तमैत्रेयौ प्राबोधयत्। उभावपि

यावदुत्थाय पर्यपश्यतां तावन्मुष्टं न्यासभाण्डं बुबुधतुः । मैत्रेयस्तस्मरणं "मन्ये मया मन्दभाग्येन कुम्भीलकस्यैव हस्ते तत्समर्पितं, न पुनश्चारुदत्तस्य" इति निश्चित्य विषण्णोऽतिष्ठत् । तदा चारुदत्तः स्वशीलदोषे लोकं मुखरयिष्यन्तममुं विपाकमनुचिन्त्य पर्यदेवयत् ॥

कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति ।
शङ्कनीया हि दोषेषु निष्प्रभावा दरिद्रता ॥ इति ॥

एवमाकुलीभूतं भर्तारमवगत्य चारुदत्तब्राह्मणी भृशदुःखिता भर्तृप्रत्ययरक्षणप्रवणेन मनसा, "स्वेन दत्तमत्युदारो न गृह्णीयात्" इति मैत्रेयमुपह्वरे आनाय्य ब्राह्मणपूजामपदिश्य स्वज्ञातिकुलोपार्जितां शतसहस्रमूल्यां रत्नावलीं तस्मै प्रादात् । स च तदाशयं जानन् गृहीत्वा चारुदत्तं विज्ञापयामास— "भोस्सदृशदारसंग्रहस्यैतत् फलं परिगृह्यताम्" इति । अभिमानी चारुदत्तः, "कथं ब्राह्मणी मामनुकम्पते । कष्टम् । इदानीमस्मि दरिद्रः यत्परिक्षीणभाग्यस्य मे स्त्रीद्रव्यमप्यादरणीयमभवत्" इति शोचन् वसन्तसेनायाः न्यासप्रतिनिधिं रत्नावलीमुपनेतुं मैत्रेयमन्वजानात् ॥

सज्जलकस्तु प्रभात एव चोरितमलङ्करणजातमादाय वसन्तसेनागृहमुपाययौ । दृष्ट्वा च विजने मदनिकां न्यवेदयत् तस्याः कृते समनुष्ठितं साहसम् । अत्रान्तरे उपरिभूमिकायां वातायननिष्क्रामितपूर्वकाया वसन्तसेना दिष्ट्या सल्लपन्तावेतौ

निर्वर्ण्य आत्मसम्बन्धिनी कथैषेति निभृतमुपशृण्वन्ती तस्थौ । अथ मदनिका तान्याभरणानि निपुणं विलोक्य प्राह—"आर्यायाः खल्विमानि, पूर्वं चारुदत्तसकाशे न्यासीकृतानि । तत्किमनुष्ठितं भवता । तत्रैव तावन्निर्यातय । अथवा तस्य सार्थवाहपुत्रस्य वचनेनेव आर्यायै निर्यातय । एवं कृते, त्वं रक्षितः, स च आर्यः अनिर्विण्णो भविष्यति" इति । सज्जलकः कथमपि तदङ्गीकृत्य वसन्तसेनादर्शनार्हमवसरं कामदेवकुले प्रतिपालयामास । वसन्तसेना च सर्वमवधार्य "पश्यामि किमत्र भविष्यति" इति कौतुकेनाभ्यन्तरं प्रविश्य पूर्ववदासीनाऽभवत् ॥

तदानीं चारुदत्तप्रहितो मैत्रेयः प्राप्तः । कृतातिथ्यश्चोपविष्ट उवाच । "तत्रभवता चारुदत्तेन त्वया न्यासीकृतः अलङ्कारः द्यूते हारितः । अतस्तस्य मूल्यभूतामिमां मुक्तावलीं प्रतीच्छतु भवती" इति । तच्छ्रुत्वा वसन्तसेना "धिक् खलु गणिकाभावम् । लुब्धेति मां तुलयति । यदि न प्रतीच्छामि स एव दोषो भवति ।" इति सञ्चिन्त्य तां रत्नावलीं प्रतिजग्राह ॥

अथ विसर्जिते मैत्रेये मदनिकाप्रवेशितोऽलङ्कारहस्तस्सज्जलकस्समुपसृत्य चारुदत्तवचनमपदिशन् न्यासं वसन्तसेनायै प्रत्यर्पयामास । चतुरा वसन्तसेना तन्मुखेन चारुदत्तस्य प्रतिसन्देशं दातुमैच्छत् । स तु, "न खल्वहं तत्र गच्छामि" इति प्रत्युक्त्वा निर्गन्तुं तत्वरे । तदानीं, "तेन हि मन्ये तस्य गृहे साहसं कृत्वा आनीतेनानेन भवितव्यम्" इति वसन्तसेना

तन्मर्म व्यावृणोत । पश्चाच्च पर्याकुलं तमनुकम्प्य, सर्वाङ्गभूषितां मदनिकां कृत्वा तस्य हस्ते समर्प्य च, उभावपि प्रवहणं आरोप्य, सबहुमानं यथेष्टगमनाय विससर्ज ॥

तस्मिन्नवसरे दुर्दिनमुन्नमितं दृष्ट्वा अविलम्बसहेन मन्मथेनोपदिश्यमानमार्गा तामेव रत्नावलीं निर्यातनीयामपदिश्य चारुदत्तमभिससार वसन्तसेना । ततः प्रभृति तावुभौ रतिमन्मथाविव चतुरिमोल्लसितनिरन्तररतिकेलिरसास्वादसुखितौ क्षपाशतं क्षणमिवानायिषताम् ॥

इति चारुदत्तचरितम् ॥

बह्वास्वादरसोर्मिलाः फणितयः प्रज्ञावतां यद्गुण-
ज्योत्स्नापूरविभावनाव्यतिकरान्निर्यान्ति सन्धुक्षिताः ।
यातेभ्यो मनुजेषु देवगणनां तेभ्यो निसर्गाज्जग-
न्नेतृभ्यश्चरिताधिवासितदिशान्तेभ्यो महद्भ्यो नमः ॥ १ ॥

कुले महत्यप्ययदीक्षितानां वाग्देवतानित्यविहारभूमौ ।
विपश्चितो यज्ञकवेस्सुतोऽस्मि कविर्महालिङ्ग इति प्रतीतः ॥ २ ॥

सच्चरितवासलोभाद्रसवत्सन्दर्भचर्वणप्रीत्या ।
निजवाक् शुद्ध्यै च मया भासकथासङ्ग्रहो व्यरचि ॥ ३ ॥

सद्भावदर्शितगुरुप्रणयेन येन
चन्द्रायितं कुमुदिनीपदवीजुषोऽस्याः ।
त्यागाभिधाय सुहृदे गुरुगौरवेण
तस्मै प्रकृष्टरुचये कृतिरर्प्यते मे ॥ ४ ॥

निर्व्याजेन निरञ्जनेन मनसा स्वप्रत्ययं मानयन्
धीरो यः प्रणयी गुणेषु वहति स्वच्छन्दमुच्चैश्शिरः ।
तस्यास्वादविदः प्रसादसुधया नीरन्ध्रमाप्यायितं
कर्मेदं परिचीयमानसुषमं ख्यातिं परां विन्दतु ॥ ५ ॥

श्रीमान्पञ्चमजार्जभूपतिरिमामार्यान्वयाधिष्ठिता-
मार्ये वर्त्मनि वर्तयन्नविकलं पृथ्वीं चिरं शास्तु नः ।
दुष्कालव्यतिषङ्गदुर्गतधियां संरम्भपांसूत्कर-
प्रादुष्योपशमं तनोतु भगवानाराच्च नारायणः ॥ ६ ॥

॥ समाप्तश्चायं उत्तरार्धः ॥

इति श्रीमदप्पय्यदीक्षितेन्द्रवंशमुक्ताफलानां, महामहोपाध्याय श्रीत्यागराजमखिराजानां प्रपौत्रेण पण्डितमान्यश्रीयज्ञेश्वरशर्मणः पुत्रेण, श्रीमन्महालिङ्गकविना विरचितो भासकथासारस्सम्पूर्णः ।

॥ शुभं भूयात् ॥

भासीयश्लोकानुक्रमणिका ॥

Index of Verses quoted from the Originals

(for Part III.)

कविकृतश्लोकानामनुक्रमणिका ॥

Index of Verses by the Author (for all the Parts.)

THE BHASAKATHASARA.

GLOSSARY.

PART III.

॥ वत्सराजचरितम् ॥

(१)

Page.	Line.	Word.	Meaning.
1	5	प्रकाश	= Famous; celebrated.
2	1	दुरितं	= Danger; calamity.
2	1	निराबाध	= Unmolested.
2	7	प्रत्यन्तवर्तिन्	= Occupying an adjacent country; a neighbouring potentate.
2	8	सांमुख्येन	= By means of a face to face encounter.
2	8	अक्षौहिणी	= A large army consisting of 21,870 charriots; as many elephants. 65,610 horses and 1,09,350 foot.
2	13	विषयान्तगहन	= An impenetrable forest in the frontier.
2	14	परिच्छद	= Train; retinue.
2	15	मदयन्ती...थैव	= Even before he had reached up to the hill named Madayanti.

Page.	Line.	Word.	Meaning.
3	5	सम्भावनीय	= Could be considered possible; thinkable.
3	13	प्रतिच्छन्दः	= A likeness; image or substitute.
4	11	प्रतिकारः	= Remedy; medical treatment.
4	11	मणिभूमिका	= A story of a house inlaid with jewels.
4	12	अवर्जित	= Won: acquired by conquest
4	13	वैतालीं	= A female bard or minstrel.
4	19	उपस्थायकः	= A servant.
4	20	निरुपाधिक	= Guileless; honest.
5	3	वृत्तान्तः	= Fate; destiny.
5	4	अवस्थान्तरं	= Altered condition; adversity.
5	10	तिथिपूजनं	= Worship offered to the gods during particular lunar days.
5	11	पटहस्थाने	= Instead of the tabor being sounded (as it was usual when the king worshipped in his palace.)
5	11	निगडाः	= Chains for the feet.
5	12	निष्कृतिः	= Discharge of a debt or an obligation.
5	19	न विप्रतिपद्यते	= does not get perplexed or confused.
8	2	मलकः	= A cup made out of a cocoanut shell.

Page.	Line.	Word.		Meaning.
9	7	नलागिरौ etc.	=	Evidently Mahasena did not want to kill Nalagiri he being a pet one and the rarest of his kind and being probably also the coronation elephant which is usually held sacred.
9	17	योजनं	=	A distance of four krosas or 8 or 9 miles.
9	20	आहिण्डमानः	=	Roaming about.
10	13	भर्तृपिण्डानृण्यंगतस्य		Who had been true to his master's salt.
12	4	भृङ्गार	=	A golden vase.

(२)

Page.	Line.	Word.		Meaning.
13	12	धिषणा	=	Intellect.
13	13	धिषणः	=	Brihaspathi.
13	16	अभ्यवपत्तुकामः	=	With the object of descending (into the fire) and delivering her (out of it.)
14	3	तापस्य	=	The royal mother leading a तापसी's life.
14	8	क्षणः	=	A fit moment or opportunity.
14	18	प्रतिष्ठिते च etc.	=	When my lord is re-established in his glory and I seek to restore to him Vasavadatta, Padmavathi shall stand by me and vindicate my conduct ; (i.e.), shall mediate

Page.	Line.	Word.	Meaning.
			to infuse confidence into the king regarding my course of action since I separated Vasavadatta from him.
17	4	**बहुमानसङ्कटं**	= Difficulty about comparative regards.
17	5	**दक्षिणः**	= An amiable and courteous lover, though at heart bearing greater attachment to one of two mistresses.
18	11	**समुद्रगृहकं**	= A summer house built in the midst of water.
19	3	**कोण**	= The bow of a lute or the intermediate points or corners (the **स्वरस्थान** s) of a Veena.
22	18	**अधिकरणं**	= Court or tribunal.

॥ अविमारकचरितम् ॥

Page.	Line.	Word.	Meaning.
24	2	**पेशल**	= Tender ; lovely ; charming.
24	11	**किमपि**	= Indescribably (as to quality quantity or nature.)
25	7	**अनादरतः**	= Indifferently, regardlessly.
26	8	**अविः**	= A sheep.
26	11	**प्रत्यनन्तरीभवन्**	= Living closely by ; following closely.
26	14	**उन्मनायमानः**	= Disturbed in mind ; agitated ; uneasy.
26	14	**अन्यादृशः**	= Changed ; unusual ; strange.

Page.	Line	Word.	Meaning.
26	15	उल्लिखन्	= Painting; delineating.
26	15	कल्पकल्पं	= Nearly equal to a thousand yugas or 432 million mortal years—measuring the duration of the world.
26	19	जातिस्मरः	= Remembering one's condition in a former life.
28	15	किमपि	= Somewhat; a little.
28	16	जालं	= Lattice or window.
28	17	यन्त्र	= A fetter—that which fastens
29	2	परिप्लव	= Trembling, restless.
31	8	सङ्केतितः	= Invited.
33	11	आकाशतोयं	= Water falling from the sky; shower-bath.
34	8	सांवत्सरिकः	= An astrologer.
35	4	अप्रतिपत्तिः	= Non-perception, i.e, not knowing what course to follow.
36	4	समयः	= Conventional usage:— a ceremonial custom.

चारुदत्तचरितम् ॥

37	1	उपश्रुत	= Heard; well-known.
37	2	चत्वरं	= A place where many roads meet.
37	3	व्यतिकर	= Affair or matter; connection—here mg. by means of (sea-voyages or trading ships across the sea.)

Page.	Line.	Word.	Meaning.
37	8	उदय	= Prosperity; also rise.
37	12	गुणः	= Virtue; excellence; also thread.
38	2	दुर्विधः	= Poor; indigent.
38	3	शकारः	= The brother of a king's wife not regularly married. He is usually a mixture of folly, vanity, cowardice and heartlessness.
38	12	पट्टः -ट्टं	= A diadem or silk-turban.
39	19	पक्षद्वारकं	= A side-door or private entrance.
39	21	चतुश्शालं	= A quadrangle enclosed by four buildings; a square of four buildings.
40	10	क्षोभः	= Irritation; disturbance;
40	20	भाण्डं	= Any valued possession or treasure, (here) jewels.
41	9	प्रतिकृतिः	= A likeness or picture.
41	14	परिच्छदः	= Garment; dress; personal possessions.
41	20	व्यवस्थया	= By arrangement.
42	2	रक्षाभरावृत्तिः	= The responsibility of keeping safe by turns.
42	10	अभिजातः	= Handsome, noble-looking.
43	4	विपाकः	= Development, adverse turn of fate, distress.
44	7	कामदेवकुलं	= Temple of Cupid.
45	17	वासः	= Perfume.
46	12	प्रादुर्ष्यं	= Manifestation.

Other Works by the same Author.

॥ लघुरामचरितम् ॥

Laghu Rama Charitam

THE RAMAYANA—for Beginners

In Easy Fluent Verses.

Price 6 Annas.

सकथासारः ॥

Katha Sara

Vol. I—Parts 1 & 2 पूर्वार्धः—प्रथमद्वितीयौ भागौ

Price 8 Annas.

Vol. II—Part 3 उत्तरार्धः—तृतीयो भागः

Price 8 Annas.

Samskrita Pathavali

Part I—*In the Press.*

The above can be had of the Author,

— OR —

R. Subrahmanya Vadhyar,

Bookseller & Publisher,

KALPATHI—PALGHAT.

St Joseph's
Industrial School
Press, Trichy.
1928.